Saveswar Swami
Veer saiva sarvotkarsha pradipika
वीरशैवसर्वोत्कर्ष प्रदीपिका
Marathi
Paper - Handwritten
N.A. (very old)
94 Folio (Folio 1 missing)
13.2" X 5.2"
Incomplete

चेत्॥ हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकं अचिन्त्यमव्यक्तमनंतरूपं शिवं प्रशा
न्तममृतं ब्रह्मयोनिम्॥ तमादिमध्यान्तविहीनमेकं विभुं चिदानंदमरूपमद्भुतं। उमासहायं परमेश्व
रं प्रभुं त्रिलोचनं नीलकंठं प्रशान्तमिति कैवल्योपनिषद्वाक्येन वालाग्रमात्रं हृदयस्य मध्ये विश्वे
देवं जातवेदं वरेण्यमित्युपक्रमोपसंहारमध्यपरामर्शिशैवैकान्तिकाथर्वशिरोवचनेन अंगु
ष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः ईशानो भूतभव्यस्येति कठवल्लीमंत्रेण च छा
गपशुन्यायेन तदेकवाक्यतापन्नमथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरो
ऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति छान्दोग्यवाक्येन च

२ शिवस्य दहरोपासनोपास्यत्वविधानेनात्रैदेवतां तद्विधानेनानियतविषयकत्वापत्तेः॥ किंचोपास
नाविधिस्थले उपास्योपासनोपासकानां त्रयाणामपि विधेयत्वेनोपासकाकांक्षायां नारायणं महाज्ञेपमिसा
द्यभिधाय पद्मकोशप्रतीकाशमिति दहरपुण्डरीकप्रदर्शनेन· स्वपरिमाणाशीष्मस्येत्यपरमिताधिकारेण
न्यायेन सन्निधिश्रुतं नारायणं परित्यज्य नान्युनिरीक्षणाया योगात्तस्यैव दहरपुण्डरीकप्रतियोगित्वा
पत्त्यालीयहृदये तस्योपास्यत्वायोगाच्च॥ नच वेदान्तविज्ञानसुनिश्चितार्थाः इत्येतद्वाक्यश्रुतयती
नामेव हृदयपुण्डरीकप्रतियोगित्वेनान्वयः किं न स्यादिति वाच्यं दर्शपूर्णमासप्रकरणपठि
तसमिधो यजतीति वाक्यविहितप्रयाजानां दर्शपूर्णमासांगत्ववन्नारायणप्रकरणपठित

हृदयस्य नारायणसंबंधित्वावश्यंभावात्॥ अपि च नतोऽस्म्यपात्मा स हरिस्तु हृत्पंकज एवापि नः दर्शि
यामास देवानां पुरा हि लिंगमैश्वरमिति वामनपुराणवचनेन नारायणस्य हृदयांतर्वर्तिप्राण
लिंगोपासनाप्रदर्शनेन भगवत्कृता सूतमेव वाच्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी इति
कृष्णेन सप्रपदनीयपुरुषं प्रदर्श्य कोसावित्युक्ते उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः यो लोकत्रयमावि
श्य बिभर्त्यव्यय ईश्वरः॥ ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति इत्युक्तोपास्यपुरुषस्य हृदयांतर्वर्तिशिवे
कोतिकेश्वरपदेन निर्णयकरणेन च दहरोपासनाधिकरणे हृदयसंबंधितायाः नारायणस्यावश्याभ्यु
पेयत्वात्। अथैवमुक्तप्रकारेणात्मा परमा शिवस्य दहरोपासनोपास्यत्वसिद्धावपि तन्मात्रस्य लिंगरूपत्वेप्र

३ मारणाभावान्त्वांतर्लिंगधारणमिति हि रितिचेन्नैवम्॥ हंसोपनिषदाद्यागमेषु हृदंतर्वामनपुराणोपितस्यतद्रूपत्वावसाया
त्॥ तथाहि एषोसौ परमोहं सो भानुकोटिप्रतीकाशो येनेदं व्याप्तं तस्याष्टधा वृत्तिर्भवति पूर्वे दले पुण्ये मतिः॥ आग्ने
ये निद्रालस्यादयो भवंति याम्ये क्रौर्ये मतिः नैरृते पापे मनीषा वारुण्यां क्रीडा वायव्ये गमनादौ बुद्धिः सौम्ये रतिप्रीतिः ई
शाने द्रव्यादानं मध्ये वैराग्यं केसरे जाग्रदवस्था कर्णिकायां स्वप्नः लिंगे सुषुप्तिः पद्मत्यागे तुरीयं यदा हंसो नादे विली
नो भवति तदा तुर्यातीतमपि अत्र लिंगे सुषुप्तिरिति हृदयांतर्वर्तिनः शिवस्य लिंगरूपत्वं स्पष्टं। आगमवाक्यानि
तु आधारे कनकप्रख्यं हृदये विद्रुमप्रभं भ्रूमध्ये स्फटिकच्छायं लिंगं योगी विभावयेत्॥ इत्यादि सिद्धांतशिखामण्या
दिवचनान्यनुसंधेयानीति अथ यात्मोपनिषदि दहरोपासनाविषये नारायणात्मोपासकत्वं शिवस्योपास्यत्वमिति

निरोधेन सहस्रशीर्षादिमंत्रानुवाकगतनारायणपरंब्रह्मतत्वेनारायणः परः इत्यादिवाक्यानि विरुध्येरन्निति नु
माशंकितव्यः तस्य च भावनापन्नस्य नारायणस्यानितरसाधारणहृदयांतर्वर्तिज्योतिर्लिंगानुसंधानसामर्थ्ये
लिंगेन तथा स्तुतिरिति योजयितुं शक्यत्वात्॥ केचित्तु नारायणपरंब्रह्मेत्यस्य नारायणस्य परं ब्रह्मेत्यर्थः॥
अत एव नारायणः परं ब्रह्मेत्यनुक्त्वा नारायणपरंब्रह्मेत्येवाभिहितम्। तथा चोक्तरीत्या तत्परत्वं शिवस्यैवेति
न कश्चिद्विरोधः इति प्राहुरित्यलमतिविस्तरेण॥ ॐ॥ एवमस्यामुपनिषदि ज्योतिर्लिंगानुसंधानरूपां तल्लिं
गधारणं विधाय रहस्यलिंगरूपबाह्यलिंगधारणमपि विधीयते सर्वलिंगं स्थापयतीति नन्वस्थापयतीति
लडंतत्वेन लिंङस्याभावान्न विधिसंभवः। न च व्रीहीन्प्रोक्षतीति व्रीहीनवहन्तीत्यत्र लिङाद्यभावेऽपि विधिप्र

४ योजकरूपसत्त्वे न यथा विधिसंभवस्तद्वदत्र किं न स्यादिति वाच्यम्। अत्र विधिप्रयोजकरूपाभावात्॥ तथाहि विधिर्

त्यंतमप्राप्ते नियमः पाक्षिके सति॥ तत्र चान्यत्र प्राप्तौ परिसंख्येति गीयते इति कारिकयेदमवगम्यते यत्र प्रमा

णांतरेणाप्राप्तस्यानेनैव विधिस्तत्रापूर्वविधिः यथा व्रीहीन्प्रोक्षतीत्यत्र। यत्र प्रकृतकार्ये उभयोः पक्षतः प्राप्तौ अ

नेनैव कर्त्तव्यं न तेनैवेति विधीयते तत्र नियमविधिः यथा व्रीहीनवहंतीत्यत्र तत्र चान्यत्र चेति समुच्चयप्राप्तौ यत्र

विधीयते सा परिसंख्या यथा पंच पंचनखा भक्ष्या इत्यत्र शशकश्शल्यको गोधा खड्गी कूर्मस्तु पंचम इति वचनप्रा

प्तपंचपंचनखानां पंचेतरपंचनखानां च प्राप्तौ पंचैव पंचनखा भक्ष्या नेतरे इति परिसंख्याविधिरिति प्रकृते सर्वलिं

गस्यापयतीसत्त्वेनापूर्वविधिः ५ लिंगधारणस्य सर्वान्ननाशितो श्रीव इति श्वेताश्वतरोपनिषद्वाक्यप्रामाण्येन प्रमा

णां तत्प्रकाशमानत्वात्। सर्वाननशीरोग्रीवस्सर्वभूतगुहाशयः। सर्वव्यापित्वभगवांस्तस्मात्सर्वगतश्शिव इति

त्यस्यायमर्थः सर्वेषां लिंगधारणयोग्यानामाननशीरोग्रीवाः अधिकरणं यस्य सः सर्वाननशीरोग्रीवः धार्मिका

णास्सन् तत्रेष्टलिंगरूपेणास्थितश्शिव इत्यर्थः सर्वभूतगुहाशय इत्यस्य सर्वभूतानां गुहायां हृत्पुण्डरीके शयः लिं

गत्वभृदिति पूर्वोक्तहृत्कहंसोपनिषत्स्थानलिंगरूपश्शिवो न लिंगरूपेणास्थित इत्यर्थः। सर्वव्यापीति त्रिविधप

रिच्छेदरहितत्वात्तत एव सर्वगत इति ॥ नन्वत्र सर्वाननशीरोग्रीव इत्यस्य सविशेषभूतशिवपदेन समानविभक्ति

कत्वात्तस्य चाभेदबोधनियामकत्वेन कथं भेदगर्भीकृताधिकरणताप्रतीतिरिति चेन्नैवं मंस्थाः समानविभक्ति

कयोरपि स्त्र्यधिकरणताप्रत्यायकत्वस्य आनन्दमयोऽभ्यासादित्यधिकरणे नीलकण्ठाचार्यचरणैरङ्गीकृतत्वात्

५ तत्रचसमयःप्राप्तुर्यार्थैकत्वस्वीकारेणआनंदब्रह्मणोर्धर्मधर्मिभावप्राप्तौआनंदोब्रह्मेतिव्यजानात्निर्लपिविज्ञानमा
नंदंब्रह्मेत्यादिवाक्यगतानंदब्रह्मपदयोरेकविभक्तिकत्वेनाभेदबोधनात्कथंकधर्मधर्मिभावइतिपूर्वपक्षंप्राप्य
आनंदोब्रह्मणोरूपमित्यादिभेदबोधकवाक्याविरोधेनआनंदाधिकरणेब्रह्मेतिराद्धांतितम् भेदवादिभिरा
नंदतीर्थीयादिभिरपियस्सर्वज्ञस्सर्वविद्यस्यज्ञानमयंतपइतिवाक्यविरोधेनविज्ञानेब्रह्मेत्यत्रविज्ञानाधि
करणंब्रह्मेत्युक्तं लौकिकेपिवस्तुकपालोघटइत्यादौतथादृष्टमिति । नचाननशरीरोजीवइत्यस्मान्नशरि
रोजीवमात्राधिकरणेकल्लिंमुख्यार्थकत्वेनतस्मात्सर्वगतात्पुण्यावइतिवाक्यविरोधइतिवाच्यम्भक्त्यानुग्रहार्थं
मोपाधिकपरिच्छिन्नत्वलिंगरूपेणाननशरीरोजीवात्सुसूक्ष्मज्योतिर्लिंगरूपेणगुहारूपदहरेभोजेपूर्व

वाक्येना स्थितिं प्रदर्श्य वास्तविकापरिच्छिन्नरूपप्रदर्शनपरः सर्वव्यापी च भगवान्नित्यस्तत्र वाक्यसंदर्भ इति योज
यितुं शक्यत्वात्॥ अनन्तरं पूर्ववाक्यगतपरिच्छिन्नरूपस्य मुख्यपार्थक्ये सर्वव्यापी च भगवान्नित्यस्तत्र चकारस्सार्थकः॥
अर्थैवमपि। उत्तमाङ्गगले वापि कुक्षौ वक्षस्स्थलेपि वा। तथा हस्ततले वापि प्राणलिङ्गं धरेत्सुधीरिति लिङ्गं त
शिलामालीवचनेन हस्तादिषु हि सततं लिङ्गं वक्ष्यमाणे प्रतिष्ठितं। मस्तके कण्ठे कुक्षौ वक्षस्स्थले करस्थले॥ इति
स्कान्दे शङ्करसंहितावचनेन च शिवशरीरयोर्लिङ्गधारणं प्रसिद्धं वापि स्थानेनैतद्भावात्कथमेतदित्याशङ्क्य लि
ङ्गरूपमेणीर्थमननात्त्रायते यस्मात्तस्मान्मन्त्रोपमीरितः। वाच्यवाचकरूपेणो द्विधा मन्त्रः प्रकीर्तितः॥ वाचको
वर्णरूपः स्याद्वाच्यश्च परमेश्वरः॥ शिवः॥ मन्त्रदेवतयोरैक्यं तस्मादहर्महर्निशं इति व्यासनिरुक्तनमःशिवाय

६ मिति प्रोक्तं शिकारं मध्यमीरितं वाकारं गोमुखं वृत्तं यकारं गोलके स्मृतं। ओंकारं लिंगमाख्यातं षडूपं लिंगमुच्यते। इति
सिद्धांतसारावलीवचनेन च पंचाक्षरीमंत्रलिंगयोरैक्येन मंत्ररूपेणानेन लिंगरूपेण शिरोग्रीवयोरधिष्ठितमिति
वक्तुं शक्यत्वात्॥ अत्र च व्रीहिभिर्यजेत यवैर्यजेतेत्यत्र पुरोडाशनिष्पादनप्रयोजनस्यैकत्वेन यथा विकल्पस्तद्वत्क
ण्ठस्थितिः शिरसि कण्ठस्थितिर्वा दिभुजायामस्यावगंतव्यं अपि चास्यामुपनिषदि क्षरं प्रधानममृताक्षरं हर इति पर
मेश्वरमुपक्रम्य लिंगधारणमाख्यातं द्विधा सर्वार्थसाधकैः। बाह्यमाभ्यंतरं चैव मुनिभिर्मोक्षकांक्षिभिः। आधारे
हृदये वापि भ्रूमध्ये वा निरंतरं॥ ज्योतिर्लिंगानुसंधानं तदेवांतरमुच्यते। अंतर्धारयितुं लिंगमशक्तश्चाक्षम एव वा
बाह्यं च धारयेल्लिंगं तद्रूपमिति निष्ठयादिति सिद्धांतशिखामणिवचनप्रामाण्यमप्यविधारणमपि तस्या

मिध्यानाद्योजनानंतत्वमात्रादिलक्षणेन तस्माभिध्यानात्ज्योतिर्लिंगरूपेणांतर मध्यानात् योजनादि
षलिंगरूपेण संयोगादिति प्रदर्शयत्कुतश्चनेत्यभिसाकांक्षयाधारणामिधकरणप्रदर्शनार्थं प्रवृत्तमिदं सर्वाननशि
रोग्रीव इत्यादिवाक्यं तत्र गुहाशयः इत्यस्य तल्लिंगधारणस्थानं प्रदर्शयति हि लिंगधारणस्थानाप्रदर्शने संदर्भ
विरोधो वज्रलेपायते। यद्यपि वैनांगीकरोषि तदा सर्वाननशिरोग्रीवः इत्येतन्निरर्थकमेव स्यात्। तथा हि स्वेनैव
वाक्येन शिवस्याननशिरोग्रीवत्वमेव विधीयते। आहोस्वित् नहुति तत्त्वं वा। नाद्यः। सर्ववाक्यं सावधारणमिति
न्यायेन तावन्मात्रामेव सिद्धे सर्वलोके वहर्युक्त इति श्रुतिविहितसार्वात्म्यभंगापत्तेः न द्वितीयः। तस्मात्सर्वगत
शिव इति वाक्यार्थादि तत्सर्वगतत्वरूप ब्रह्मलिंगस्य संकोचापत्तेः असम्मतेनुसार्थका गुरुकमेवेति ननु

७ सर्वाननशिरोग्रीव इत्यत्राधिकरणे तानेवधकृपदसत्वे सर्वमेतदेवं स्यात्तथात्र नास्तीति चेन्मैवं स्याननशिरोग्रीवाःअ
धिकरणेनास्य सन्तीति मत्वर्थीयात्ययेनैकवाक्यवैयर्थ्यपरिहाराय परं हि वाक्यवैयर्थ्यात्स्यदमाचस्य लक्ष
णेति न्यायेन लक्षणया भावात्तद्बोधावशंभावात्॥ अभ्युपगतं च पूर्वतंत्रे एकादशप्रयोरवदानानि तानि द्वि
रवद्यतीत्यत्र पाशुके हविषि प्रकृतिवद्धि कृतिः कर्तव्येति चोदके नैव द्विरवदानप्राप्तौ तानि द्विरवद्यतीति
अवदानद्वित्वविधायकवाक्यस्य वैयर्थ्यमिति पूर्वपक्षीकृत्य यद्यपि चतुरवत्तीयजमानः पंचावत्तीववपा
कार्येति वाक्येन वपापदस्य हृदयादिसाधारण्येन पाशुकहविर्मात्रे लक्षणां स्वीकृत्य हृदयादिष्वपि पंचाव
दानसिद्ध्यर्थे उपस्तरणाभिघारणयोस्तत्रावदानत्रितयप्राप्तौ हविर्द्विरवदानमप्य पंचसंख्यापूरणं तु उपस्त

रणादिवृथाकर्त्तव्यमितितत्सार्थक्यं साधितमितिसर्वैर्मुमुक्षुभिस्सास्माकीनः पंथाः पूर्वाचार्यैस्तुसर्वैर्लिंग
स्यापयनीलत्वेनापूर्वविधिः पाणौ मंत्रं पवित्रमितिविशेषणेऽस्य वक्ष्यमाणेहि स्यापाण्येधिकरणैकपूजाप्र
तिपादकत्वसमर्थनेनतदन्यथानुपपत्त्यालिंगधारणप्राप्तौ नैकालिकप्राप्त्यभावात्तद्वत्त्वः। ननुमास्त्व
पूर्वविधिः परं तथाजननाध्यापनप्रतिग्रहेव्रीह्णायनमाजेयदिसादानियमविधिरेवस्यादितिचेन्न
दपिगगनकुसुममालिकाधारणमनुकरोतिमुक्केविषयेभस्मोच्छूलनोभस्मशय्याशयानोरुद्राक्षधारी
मुच्यतेसर्वपापैरितिशातातपस्मृत्यादिविहितभस्मरुद्राक्षादिधारणस्येवलिंगधारणस्यापिपक्ष
तः प्राप्तौलिंगधारणमेवकर्त्तव्यं नभस्मादीतिनियमोगीकरणीयः। सोऽप्यनिष्ट एव॥ पिण्डेनापिवद

८ विज्ञानं तं समारोहयत्। दीक्षालिंगधृतिश्चैव विभूतेरपि धारणं। रुद्राक्षधारणं चैव पंचाक्षरजपस्तथा। भक्ति
मार्गक्रिया चैव गुरोर्लिंगस्य चार्चनं। योगिनश्चान्नं तथा तेषां प्रसादस्वीकृतिस्तथा। एतानि शिवमन्त्रस्य कर्तव्या
नि प्रयत्नतः इति सिद्धान्तशिखामणौ सर्वेषामप्यावश्यकत्वोक्तेः॥ ननु तर्हि लिंगधारणकर्तव्यतानि
षेधपूर्वककर्तव्यताफलकपरिसंख्यैव मूलादिति चेन्मैवं। तत्कर्तव्यताकर्तव्यतयोरेकदाप्रसक्त्यास
मुच्चयासंभवे परिसंख्यायोगादिति पूर्वः पक्षः॥ अत्रोच्यते। सर्वलिंगस्थापयन्तीत्यत्रापूर्वविधिरेव न च
धारणस्य सर्वाननन्तरीणेष्वपि वृत्तिकाकाम्यविहितत्वेन नैकालिकाप्राप्तिरिति वाच्यं। अस्य सर्वप्रतिपाद्या
धिकरणप्रकृतियोगिप्रतियोगिलिंगधारणविधायकसर्वलिंगवाक्यसापेक्षत्वेनोपजीवकेनोपजीव्यस्य

न्यथासिद्ध्ययोगात् न चास्य स्वसमानाधिकरणेन तस्याभिधानायोजनानन्तर्भावादिति वाक्यविहित

धारणाधिकरणानिरूपकत्वेन न सर्वलिंगावाक्यसापेक्षतेति वाच्यम् वैषम्यात्। अत्रानितरसाधारण

लिंगश्रुतिसत्वेन स्यात्पपत्तीति धारणविधायकपदसत्वेन तद्विनियोगोपस्थितिकतद्वाक्यापेक्षया वलव

त्वात्। न च लौकिकवैदिकाधिकरणेन व्याकरणादिना गृहीतशक्तिकलौकिकशब्दानामेव वैदिकत्व

निर्णयेन पशुना यजेतेत्यादौ पश्वादिशब्दानां शक्तिग्रहार्थं व्याकरणादिसापेक्षत्वेपि यथा विधा

यकत्वे स्वीकृते तद्वदिहापि किं न स्यादिति वाच्यं। व्याकरणादौ शक्तिग्रहमात्रोपयोगित्वेन तथात्वे

पि स्वत्रयावद्वाक्यार्थविचारं विना लिंगधारणप्राप्तेस्तत्कालमेव सर्वलिङ्गवाक्यस्य विधायकत्वा

१९ सिद्धेः। किं चात्र सर्वव्यापी च भगवान् इति लिंगस्तुतिसमर्पणेन अर्थवादत्वनिश्चये सत्यनेन तदन्यलि[ङ्ग]योगाच्चाप
च्चोक्तं पाशुपतं मंत्रमिति विशेषणोपात्तिपाद्यार्थोऽन्यथानुपपत्या तस्य प्राप्तत्वेन विध्यसंभव इति तन्न अस्यापि सर्व
लिङ्गवाक्येन सामान्यतो धारणे विधानाधिकरणे विशेषसमर्पकत्वेन तद्वज्जीवकेन तदन्यथासिद्ध्योगादिति
पाशुपतं मंत्रमित्यस्य धार्यत्वेन संज्ञोपस्थापकत्वोपस्थितिमंत्रमिति मत्वर्थीयाच्प्रत्ययेन कृते मंत्रे लिंगं पाशुपतं मंत्रं पा
शुपतं मंत्रमित्यर्थः तस्मात्सार्वमहालिंगं पाशुपतं मंत्रेति मंत्रतः इति लिंगपुराणोक्तेः। अत्र च अग्निहोत्रं जुहोती
ति वाक्यविहितनिरधिकरणाग्निहोत्रनामकहोमस्याधिकरणसमर्पकाहवनीये जुहोतीति वाक्यस्येव इव वि
षमविधिः सर्वलिङ्गवाक्यविहितलिंगधारणाधिकरणस्यैव पाशुपतादेः पक्षतः प्राप्तौ पाशुपतादिकमेवेति।

नियमो विधीयत इति न चाहवनीयवाक्ये ऽधिकरणताबोधकसप्तमीविभक्तिसत्त्वेन तथात्वेप्यत्र तदभावा
त्कथमिति वाच्यं । लुप्तसप्तमीस्मरणेनास्य अधिकरणत्वप्रतीतेः । पवित्रशब्देन यज्ञोपवीतं परमं पवित्रं
मित्यत्रेव अश्वत्थिकाख्यधारणप्रयुक्तपवित्रनिरसनद्वारा पवित्रं विधीयते । न चानेकविधाने वाक्यभेद
इति वाच्यं । आग्नेयोष्टाकपालो मावास्यायामित्यत्रेव अप्राप्तत्वे विधीयन्ते बहवोप्येकयत्नत इति न्या
येनानेकविधाने दोषाभावादिति । नन्वेवमपि उत्तरलिंगस्थापयतीत्यनेन भूम्यामेव लिंगस्थापने विधी
यते स्थापयतीति पदस्वारस्येन सकलजनाधारविषयत्वेन च तस्मै वावश्यकत्वात् तथा च सति यागीयं
त्रे पवित्रमिति विशेषणमपि यातिकेनाभिमंत्रितं षडध्वशोधनादिनासंस्कृतं अत एव पवित्रमित्यर्थकं सत्

१० सार्थकं भवतीति चेदत्र वदंति स्थापयतीति स्वभूलिंसाधारणेनैव लिंगस्थापनविधायकत्वात्सिसवलीयते
श्रुतेः संकोचाहि षण्णामहि निगमकाभावाच्च ॥ किंच संगिनि स्थेनुवा संशेषादृते मायेन पाणिमंत्रमितिवाक्य
शेषवलाच्छरीरं एव लिंगस्थापनविधायकत्वं सिध्यति पुरोगाद्दौ माल्यइत्यत्र पूजार्थकत्वेन प्रसिद्धस्य पूजार्थ
कधातुनिष्पन्नस्य च मननशब्दस्य पूजार्थकत्वे मननात्पूजनात्त्रायत इति मंत्रं पाणौ मंत्रं पाणौ मंत्रामिति हि
दे पाणिस्थितस्य पूजापाः स्थावरेऽप्रसक्तत्वात् शरीरस्थलिंगपरत्वावगत्यात ॥ नच पाणौ नामनना
त्रायत इति तीयासमासाश्रयणे स्थावरेऽपि न विरोध इति वाच्यं तथा सति हापेक्षसमासाश्रयणे
न समर्थपरिभाषाभंगापत्तेः । सापेक्षत्वेपि गमकत्वात्तथा गीक्रियत इति चेन्न पाणिपदवैयर्थ्यात् नच

मननात्त्रायत इत्युक्ते मानसादीनामपि करणत्वेन प्रसक्तातद्व्यवच्छेदार्थं पाणौ पदमिति वाच्यं। शिवपू
जादिकं कार्यं मनोवाक्कायकर्मभिरित्यभियुक्तोक्तानेतानपि करणत्वप्राप्तेः किं च तृतीयासमासा
श्रयणे एकदेशान्वयापत्तिः न च समस्तमीनस्यैव षाष्ठ्यपदे पि एवं दोष इति वाच्यं। पाणिपदस्य विशेष
नैवान्वयस्वीकारादिति ॥ यत्त्वोक्तं पाणिनाऽभिमन्त्र्य नाभिमन्त्रितत्वगुणप्राप्तेः पूजावाचकस्याभिमंत्रि
तार्थकत्वं गौणार्थस्वीकारापत्तेः। न चेष्टापत्तिः ईक्षत्यधिकरणविरोधात्। तत्र तत्तेज ऐक्षतेत्यत्राप्यैक्ष
क्षंतेत्यादि गौणार्थस्वीकारेण प्राप्तः प्राधान्यबाधानेनेक्षितृत्वमादाय प्रधानपरत्वमिति पूर्वपक्षे एकत्र
गौणार्थकशब्ददर्शनेपि सर्वत्र तथात्वायोगान्मुख्यत्वे संभवति गौणार्थस्वीकारस्याजघन्यत्वेन च मुख्ये सि

११ न.त्वमाहायपञ्चस्थलमेवेतिनिर्णीयात इति ॥ अथसूत्रम्ः ॥ निधनपतये नम इत्यारभ्य एतत्सोमस्य सूर्यस्येत्यंतं
सर्वोपमर्थवादः ॥ तत्र अखंडमेकं लिंगं स्थानदेवगुह्णपरं भाव प्राणोष्टभेदे न त्रिधाभूतेन गात्मजे ॥ इष्टलिं
गप्रकृतिके आचारगुरुलिंगके ॥ पार्थिवाप्य इति प्रोक्ते ऐश्वागमविशारदैः ॥ प्राणलिंगप्रकृतिके तेजो
वायुमयेन तथा ॥ शिवलिंगचराभिख्ये लिंगे द्वे वरवर्णिनि ॥ व्योमप्रकृतिकं लिंगं प्रसादाख्यं महत्तरं ॥
आत्मतत्वमयं प्रोक्तं महालिंगं महत्तमामिति विकृत शेखरवचनेनोक्तानां दशविधलिंगानां नमोंतस्तुति
र्दृश्यते ॥ तत्रोर्ध्वलिंगायनम इत्यखंडलिंगमुच्यते तस्य सर्वचक्रोर्ध्वगतेकदलकपाश्चिमचक्रास्थित
त्वात् ॥ हिरण्यलिंगायनम इत्यनेन प्राणलिंगं स्तूयते तत्सकांचनसंकाशं कंदस्थानसमाश्रितं ॥ योगी

भिन्नं सदा ध्येयं प्राणलिंगं विदुर्बुधाः इति लिंगं तस्मात् कुलीनत्वनेन तत्स्वेक्षोत्तम समपलनिश्चयात् । सुवर्णो
पलमहती॰ लिंगार्थे नादः नमः पीठमिति प्रोक्तं शीकारं मध्यमीरितं ॥ वाकारं गोमुखं प्रोक्तं यकारं गोलकं ।
स्मृतं ओंकारं लिंगमाख्यातं षड्वर्णं लिंगमुच्यते ॥ इत्यनेन लिंगशरीरं घटकत्वेन वस्तुस्थलविशेषवर्णो
रूपलनिश्चयात् ॥ दिव्यलिंगायनमः इत्याकाशतत्वाधिष्ठितप्रसादलिंगस्तुतिः ॥ दिविभवं दिव्यमिति
श्रुतत्वात्तयोरभेदात् । भवलिंगायनमः इत्यनेन गुरुलिंगस्तवः क्रियते ॥ ज्येष्ठा जलमयीतत्वाधिष्ठितसुपाद
नलक्षणाति ॥ भवस्य ईशस्य ज्येष्ठो ज्येष्ठत्वात् ज्ञानक्रियेति जलतत्वाधिष्ठितगुरुलिंगेन भवलिंगाभेदात् ॥
शर्वलिंगायनमः इत्याचारलिंगस्तु ॥ वामा तत्वपृथ्वीतत्वभूता वामाप्तिकायया ॥ सृष्टिः प्रवर्तते वामासाश

वेक्षितिमूर्त्तिपर इति सिद्धांतसारावलीवाक्येन पृथिवीतत्वाभिमानिनः आचारलिंगस्य शर्वलिंगाभेदप्रति
पादनात् ॥ शिवलिंगाय नमः इति शिवलिंगस्य ॥ अग्नेश्च रुद्ररूपत्वाद्रुद्रो ह्यग्नेर्यीतदीश्वरः सर्वेषां पशुपती रुद्रोऽ
दीत चक्षुरुक्तिरिष्यते इत्यनेन तेजस्तत्वाभिमानि शिवलिंगस्य शिवपदस्थानापन्न रुद्रपदवाच्याभेदप्रतीतेः ॥ ज
ललिंगाय नमः इति चरलिंगस्य ॥ प्राणस्य कालरूपत्वात् कालशक्तिस्तु वायवी ॥ वायुमूर्त्तिपदस्य तु सका
ल इति विश्रुत इत्यनेन वायुतत्वाधिष्ठित चरलिंगस्य उग्रपदवाच्यज्वललिंगाभेदनिश्चयात् परमलिंगाय
नमः इत्याकाशतत्वाभिमानिनो महालिंगस्य स्तुतिः ॥ आत्मलिंगाय नमः इति कारणशरीराधिष्ठितभावलिं
गस्येति । तथाचार्थवादस्यागमोक्ताचारोपाधिकभेदभिन्नशरीरस्थलिंगविषयत्वेन सर्वलिंगस्याप्रतीतस्य

स्यावरलिंगविधायकत्वेनविध्यर्थवादयोर्वैयधिकरण्यापत्तेः॥ किंचउपक्रमोपसंहारावभ्यासोपूर्वताफल
म्॰ अर्थवादोपपत्तीचलिंगंतात्पर्यनिर्णयेइतिषड्विधतात्पर्यलिंगानांमध्येऽत्रसंजातविरोधिनः उपक्रम
स्यवेदोपात्तापरदर्शनादितिवेदोपक्रमाधिकरणन्यायेनबलवत्वेन ऊर्ध्वलिंगायनमस्त्वाद्युपक्र
मस्यप्राणलिंगपरत्वनिश्चयेसर्वलिंगवाक्यस्यशारीरधृतलिंगव्यतिरिक्तविषयत्वेप्रकरणविरोधश्च।
नचएतत्सोमस्यसूर्यस्येतिपूर्वोक्तनमस्कारपरामर्शकेनतच्छब्देनसूर्यसोमनमस्काराभिधानात्मकरण
विभेदइतिवाच्यं। उपक्रमोपसंहारयोःशिवपरत्वनिश्चयेनमध्येसोमसूर्यनमस्काराभिधानेसंदर्भविरोधा
पत्तेःसोमएकेभ्यःपवतेघृतमेकमुपासते इत्यत्रेवउमयासहितःसोमइतिव्युत्पत्त्यासूर्यस्यसूर्यमंडलांत

१३ वेर्तिनः सोमस्य लिंगरूपशिवस्येत्यर्थावश्यंभावात् ॥ उक्तौ त्यागमार्गे लिंगनाकारस्य शरीरधार्यलिंगपतले स्थौ ह्रुं वदे
पूर्वोभवत्सु ग्लौ ह्रुं वर ऊर्ध्वशयन ऊर्जैवात्स्मा ऊर्जेय पशून्नान्तोस्मूर्जोवहद्ध्या इत्यन्नेवाथर्वादवेपथ्यभी त्साविघ्यिकल्पन
मपि संगच्छत इति ॥ अथैवमप्यस्य न नित्यविधित्वं । नात्युमाभ्यंतरं चैवमुनिमि मौंछकाश्लेमिरितिप्राग्दशाह्न
सिद्धांतशिखामणौ वचनेन फलश्रवणादि नित्यत्वेनैवं । नित्येसंध्याम्रुपासते ये तु सततं संशितव्रताः । विधूतपा
पाप्लेपांतिम्रम्हलोकमनामयमित्यर्थवादकफलश्रावणो नानित्यतानापत्तेः । यदि तत्रस्त्र तु पास्यान्त्रिकालेषु
संध्यामन्त्रादिमुप्लवेत् ॥ ज्ञानयोनिशतं गत्वा चांडालः कोटिजन्मसु ॥ इत्यधिकरणोप्रत्यवायस्मरणान्नि
त्यत्वमुच्यते प्रकृतेपि समानं । भक्तस्याविच्छिन्नतो लिंगधारणाविधारणो ॥ ध्वमांसभक्षणं तावद्न्नेन रचितेम

वेदितिवातुलादिवचनैरकैरणोग्रस्य वामाभिधानात् ॥ निमित्तत्वस्य श्रुताउक्तोमामपंप्रतरेदिति ॥ इतीहासपुराणा
म्नां वेदार्थमुपबृंहयेत् ॥ वेदार्थोपबृंहणं ज्ञानतस्तन्त्रागमानन्तरं शैवेदपि ॥ अत्र षिभिर्निश्चितेतस्मिन्काशांकाणस्मोन्महात्म
नां इत्युक्तत्वेनतस्मात्मश्रुतेरुक्तार्थेऽपहृत्सलमप्यन्ति तथाहि ॥ लिंगपुराणे ॥ वेदेषु शास्त्रेषु सर्वेषु पुराणेष्वागमेषु
च ब्राह्मणोऽस्य समास्मानं लिंगधारणमुत्तमं इत्युपक्रम्य यजुःसप्ताहस्त्रे वेलिंगस्यापि पवतीति च ॥ तस्मा
दर्थे महालिंगं पाणिमंत्रेणमंत्रतः ॥ पाणौलिंगं विनिक्षिप्य दीक्षाकाले गुरुः शिवं ॥ येन स्तुवन्ति तन्मं
त्रे पाणिमंत्रे वदंतिहि ॥ पवित्रंतारकेशस्य शिवस्य प्रतिपादनात् ॥ पवित्रकारणात्तस्मात् पवित्रमिति कथ्य
ते तस्मात् सर्वेषु कालेषु धारयेल्लिंगमुत्तमं गच्छंस्तिष्ठन् स्वपन् जाग्रन्निमिषन्निमिषन्नपि ॥ श्रुतिर्बोधश्रुति

१४ वोपिलिंगं सदैव धारयेत ॥ लिंगधारी सदा शुद्धो निजलिंगं मनोहरं ॥ अर्चयन् गंधपुष्पाद्यैः करपीठे समाहितः ॥ नि
त्यानि कर्मवृंदानि तथा नैमित्तिकानि च ॥ शिवार्पणधिया कुर्यात्सम्यग्ज्ञानाभिवृद्धये इति ॥ कोंदेशं करसंहि
तायामपि ॥ यो हस्तपीठे निजलिंगमिष्टं विन्यस्य तल्लीनमनःप्रचारः ॥ बाह्यक्रियासंकुलनिस्पृहात्मा संपूज
यत्यंग स वीरशैवः ॥ तदेव हस्ताब्जपीठमध्ये निधाय लिंगं परमात्मचिन्हं ॥ प्रपूजयेदेकधियोपचारैर्निरस्त
बाह्यांतरभेदभिन्नः ॥ बाह्यपीठार्चनादेतत्करपीठार्चनं वरं ॥ सर्वेषां वीरशैवानां मुमुक्षूणां मनीषितं ॥ इत्यादि
ना पाणौ मंत्रं पवित्रमिति वाक्याद्विहितपाणिपीठिकारणेकपूजाश्रेष्ठ्यमुक्त्वा न तत्सूतके वत्स प्राणलिंगोपा
संगिनः ॥ जननमृत्योर्थं वा विद्यते परमार्थतः ॥ जातके मृतके वापि न त्याज्यं शिवपूजनं इति लिंगधा

रणेन यावज्जीवं हीनोऽस्ति तस्मादशुचिकालेऽपि शिवपूजादिकं कर्तव्यमित्युक्तम्॥ देवार्चनादिकं कर्म कार्यं
दीक्षान्वितैः सदा॥ नास्य शौचविधिस्तेषां सूतकं च महात्मनां॥ शैवं देवार्चनेप्यस्य स्याच्चाग्निपरिग्रहः॥ ब्रह्मचा
रियतीनां च शरीरे नास्ति सूतकं॥ इत्यादिस्मृत्युत्तरागमेऽपि तथैवाभिहितमिति॥ नन्वशुचिकालेऽपि शिवपूजाकर
णे कर्मान्तरानुष्ठानस्य तदापत्तिरिति चेन्नैवं॥ नित्यसंकल्पितसंध्यावन्दनादिकालीनसूर्योपस्थानवि
नियुक्तमित्रस्येत्यादिमंत्रोच्चारणस्याग्निसोपासनावैश्वदेवादिविनियुक्तमन्त्रपाठस्य दर्शपूर्णमासेष्टिवि
नियुक्तवेदस्य च नानिरोधस्तनध्याये होममन्त्रेष्वेवाहि नैमित्तिकेऽस्तनध्यायेब्रह्मसत्रं हितत्वस्य तामि
तिमनुस्मृत्यनुरोधेन स्वनध्यायनकालकर्तव्यत्वेऽपि न यावद्देहाध्ययनस्य॥ तदुक्तरीत्या यावज्जीवम

१५ कृ॰ल्पित शिवपूजाकरणेषु शुचिकालेन कर्मान्तरानुष्ठानापत्तिरिति चेन्नत्वात्मलाभमूलानन्त्यस्य तस्मात्प्राण
धिकारणकशिवपूजायाः। तथाप्येवामहस्तस्यात्यन्तापकृष्टत्वेन तन्त्रतत्करणमयुक्तमिति चेन्न अग्रलिना
वामिभेदत्वेवैणापात्रेणोविष्टस्योपानकरणाग्रलिपुटकृतत्वेन सर्वहस्तस्येव अग्रस्योपष्टपयोगविधानेन सकृ
लवैदिकजनावश्यकर्तव्यप्रसिद्धिप्रसिद्धज्ञलौ पूर्णपात्रमानपतीतिशिष्टस्य पूर्णपात्राधाराञ्जलिप्रविष्टत्वा
महस्तस्योपयोगस्यावश्यम्भावेन। उरसा शिरसा दृष्ट्या मनसा वचसा तथा। पद्भ्यां कराभ्यां कर्णाभ्यां प्रणा
मोऽष्टाङ्ग उच्यते॥ इति बोधायनेन रुद्रन्यासैकादशपरमशिवनमस्कारयोग्यत्वप्रदर्शनेन च षोडशोपचारिक
रहस्येन पुष्पाञ्जलिप्रदानावृतत्वाच्छिवपूजाकरणे दोषाभावात्। ननु यस्यापि भवदुक्तरीत्या सर्वसिद्धसस्या

१यती स्वस्मल्लिङ्गधारणेन प्रलये प्राप्ते आत्मनस्थापि वेदार्थप्रयोगलक्षितविद्यारचिते स्वतन्त्रलेनात्माख्यानात्मद्वेहरिः
चैतन्यदेवतद्वन्दिरके णिजाप्रमशिक्षरोपितिनेरस्मात्मानतेः पि कालहानि हि क्षितिप्रज्ञ्वलनपश्यतानाध्यप्रभृतिनि
सत्यत्वेन माध्मानान्दविद्यारण्यस्वामिभिः प्रक्रान्तार्थैः नुपयोगाद स्वथात्माख्यानेदेषापावोपैस्तिनम्रतार
थादुर्गमन्त्रालामपिनैरमात्मनात्नेनसमयमननतत्त्ववेदिनाम् शङ्काराचार्याणाम् दुर्गापूजाविनियोगोपसर
ऽन्तरङ्गवत्त्वात् किञ्च सकलवेदार्थदुर्बोधमेधावद्भादरपरमाचार्यैरेवास्माकं तेनैकत्वार्थानुसारेणालिङ्गधारणमा
उपबृंहितत्वेन वेदागमप्रमाणत्वेः उपपादितैर्वेदान्तसिद्धान्तशिवलोकसम्पादकोपबृंहितत्वेन च संदेहयोगादिति सर्वे
मननवशम् ॐ श्वेताश्वतरोपनिषदि मन्त्रान्तरेणापि तन्निसिद्धः । ॐ नमो ब्रह्मणे धारं मे अस्त्वनिराकरणम् धार

१६ यत्तामूयासमकर्णयोरुरतमस्मान्नोद्धमस्मन्नामुष्यस्योमिति नन्वनेनमन्त्रेणानलिङ्गधारणासिद्धिः मेधारणम
स्तुस्यैङ्गधारणैतामम्भूयासमिति वाक्यद्वयेपि विशेषसमर्पकपदाभावेन धारणमात्रप्रतीतेः नचदेवतान्तरधा
रणेप्रमाणाभावाद्वाच्यपरिशेषाल्लिङ्गधारणसिद्धिरितिवाच्यम् देवतान्तरधारणप्रसिद्ध्यभावेपिना
रायणप्रतिकृतिविशिष्टत्वेनशंखचक्रादिधारणस्य रामानुजमतसिद्धत्वेनप्रामाणिकत्वेनचतस्यैवधारणप्रसिद्धेर्यो
गित्वेनान्वयसंभवात् नचअग्निराकरणेति अस्योत्पादकविनाशशालित्वेननिराकरणम् हेयप्रपञ्चमन्तव्यभव
नीयत्वनिराकरणमन्त्रपादेयमन्त्रमस्येत्यर्थकत्वेनतस्यैवधारणोन्वयेनअर्थोल्लिङ्गधारणसिद्धिरितिवाच्यम् एतादृ
शावयवशस्त्रास्त्रनिराकरणपदेत्स्यापलस्यमन्तान्तरोत्सानारायणात्स्यतद्धर्मीणांचावश्यकत्वेनतेषामपि

धारणायन्वयासिद्धौ तुल्यदोषान्नघापातन् किंच विभूतिर्यस्मिन्नोक्ता ले कंठे हस्ते रुद्राक्षमालिका मुखे षडक्षरो मन्त्र

स्तान्नसजेदन्त्यजं यथा ॥ तुल्यं ते त्रिपुण्ड्रमनसाधिनलिंगधृयेत् इत्यादि विधीयते तस्मान्नत्यागी पतितो भवेत् भू

तिरुद्राक्षधारणाकरणे प्रत्यवायश्रवणेन तथैव वाग्धारणप्रतियोगितेनान्वयसौख्ये॰ धारद्वनामूपासमि

स्तत्रविधत्वं भवान्स्वाशौ लिंग॰ लेन विधापाकत्वात्स भवात्नकाविधिप्रयोजकरूपसत्वम् सर्वेलिंग॰ वाकोना

मथाविद्धुत्वादिति पूर्वः पक्षः अत्रोच्यते निराकरणमुपादेयम् यल्लिंग॰ स्वरूपमत्रमत्ते तद्धारद्वनाभूयासमि

सेवा॰ सौख्ये तेनाराधनात्तद्धर्मोणाम प्रवशत्वानिराकरत्वामितितद्दुक्तम् सर्वेभिदम् ब्रह्मविष्णुरुद्रे

न्द्रास्तेसंप्रसूयंते इत्यथर्वशिरोबोदिवाके अयस्य स्वेकारणात्मानो जातास्तप्रक्षानमहेश्वरात्नपितानि पतनं पु

१८ वैजयी पवित्रितकर्मा पुण्ये महासर्गे हरिस्त्राणे रुद्रस्संहरणे पुनः इत्यादिश्रीविष्णोर्वचनैश्च नारायणस्योत्पत्तिश्रवणात्
तदीयपरं वेचक्रादेश्च चक्राङ्कितनतनुर्वैष्णवत्वादिवत्संपन्नेन यदिति ष्टेन्महापापी सहस्रेणन्महत्तमभवेत् इत्यानाद्यथवा
लोभाद्वागतो वासुदर्शनमधनेकुलघ्नं तद्दृष्टा सचैलमन्वानमाचरेत् इत्यादिनाच निराकृतत्वेनस्यनिराकरणपदे
पस्यापत्ताभावात् विवेचइत्यनेवेदमुपरिष्टान्निरस्यतु नकारणम् कारणानां घाताध्यानाकारणन्तु ध्येय इत्युक्त
स्वभावप्रोक्तौ च नारायणादि जनकत्वध्येयत्वादिप्रदर्शनेनानिराकरणपदवाच्यत्वादुक्तरीत्या लिङ्गरूपि क
लेनचतस्यैव धारणप्रतियोगित्वेनान्वय इति वक्तव्यतस्तु धारइत्याभूपालमिति सामान्यतो धारणेति धापधारणोकि
मित्याकांक्षायामसम्भावस्यत्वं इत्योंकारवाच्य केवललिङ्गस्यैवविधानात्तस्यैव धारणेऽन्वयः तथाचनिराकर

मुपादेयमवेद्यत्वात्स्वप्रतिपाद्यत्वेन कर्णयोरपि तन्मम् ओंओंकारपदवाच्यमपरिच्छिन्नवस्तुरूपं लिङ्गम् तस्य रस्ता
भूताभूतासमिलक्षणार्थः ननु ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्ग
लिकावुभाविति मङ्गलार्थकत्वेन अकारो वै सर्वा वागि त्यकारस्य सर्ववागन्तर्गतेन ओंकारप्रकृतित्वात्तस्य वकार
स्य विष्णुवाचकत्वेन च न लिङ्गार्थकत्वसिद्धिः ओंकारस्येति चेन्नैवम्। अकारं ब्रह्माणं नाभौ उकारं विष्णुं हृद
ये मकारं रुद्रं भ्रूमध्ये ओंकारं सर्वेश्वरं द्वादशान्ते इति तापनीयोपनिषद्वाक्येन एवं त्रिमूर्तिरेवैतन्मात्रात्मिरेखे
लम्। त्रिधामात्रामधिष्ठाय शिवात्मानम् बोधयत्स्वयं मात्रात्रयेति शिवपुराणवचनेन लिङ्गपुराणे विष्णुकृतशिव
स्तोत्रे॥ सर्वज्ञायनमस्तुभ्यमोंकारायनमोनमः इत्यनेन चार्थमात्रास्वरूपोंकारस्य परमशिववाचकत्वाभिधाना

१८ तत्त्ववाचकः स्थूलनिर्कोंकारस्य अकारः शास्त्रविषयुवाचकत्वमितिवाच्यम् अशेषवाचकनामकारस्य हलत्वेन तद्वाच्येनैववाच्यसि
द्धोः शक्तिमात्रोच्छेदापत्तेः अकारादिवर्णैः सर्ववाच्यैः सर्वोंकारेण सर्ववाचकत्वं घोतितं न स्याद्वाचकत्वात् अन्यथा पूर्वपूर्ववर्णा
नामुत्तरोत्तरविनाशकत्वेनाकारादिरूपस्यार्थमात्रादिलीनत्वेन तदात्मतापत्त्या तद्वाच्यशिववाचकत्वमिति नैव परीक्ष्या
पत्तेः ॥ अत एवमङ्गलार्थकत्वमपीति श्रुतिः ॥ समेध्यपतिः शिवमित्युक्तं सर्वार्थानामुपलक्षणे ॥ शिवमिच्छन्मनुष्याणां तस्मा
द्देवः शिवः स्मृतः ॥ नमो भवन्ति मे सर्वे दानवासुरराक्षसाः । शिवोऽस्मि सर्वभूतानां शिवत्वं तेन मे सुराः इति कर्णपर्वणि ॥
शिवपदनिरुक्त्या शिवस्य सर्वमङ्गलप्रदत्वं निश्चयात् । न चोंकारस्य शिववाचकत्वे प्रतिलिङ्गपत्वे किं प्रमाणमिति
वाच्यम् । लिङ्गे सुप्रतिष्ठिते नित्यं पूर्वोदाहृतं हंसोपनिषद्वाक्येन शिवस्यैव लिङ्गरूपत्वावसायात् ओंकारस्य लिङ्गमात्मा

तमित्यागमवचनेन साक्षाद्देवतात्वरलाञ्छनत्वोक्तं भूतिरुद्राक्षयोर्वैदधारणयोः न्वयह्नितत्र विकल्पयामः प्राधान्ये
नान्वयो वा वृतलिङ्गधारणे नतोपलेनवा नाद्यः तद्रूपस्याप्यक्षपदाभावात् नहि भूतिरुद्राक्षयोरप्यस्यापकमोंकारणे
तिकुत्रापि प्रतिबन्धम् नद्वितीयः इष्टापत्तेः केचित्तु स्त्रनि एकरश्मिसनेन भूतिरुद्राक्षयोर्ग्रहणे किमेतिलिङ्गस्तन
धाचत्र धारणमपि धारणे प्राधान्येनान्वयः स्यात् यत्स्युक्तमभूत्वा समिस्तत्र स्त्राश्रीलिङ्गलेनन विधित्वं भवतीति
तन्मन्त्रं मेधावी भूपा संमहमेकः प्रथममासमिस्तत्रेवतत्त्वं भवात् नचतत्र विधिप्रयोजकरूपसत्वेन तत्त्वं भवेदप्यत्र
तद्भावान्न विधित्वं भवत् इतिवाच्यं स्त्रश्राविधारहता भूपासमिति विहितालिङ्गधारणं सर्वलिङ्गिनाम् गंस्यापप
तीसनेनानूद्य पालीमंत्रमिलमधिकरणमात्रविधिरितिस्त्रीकारे स्त्रनयथासिद्धभावेन विधित्वं भवात् स्त्रास्तेनाव

१८ दयमर्थवादः तथापि न लिङ्गधारणपरत्वं हीयते कर्णपोशस्य न मन्निराकरणमों लिङ्ग मित्यादिना तस्यैव स्तुतिसमर्प
णात् तुङ्कीत्याद्युदाहरणं निषायस्यापि सर्वलिङ्गगतस्याप्ययतीत्वस्य च वाक्यान्तर लिङ्गधारणपरत्वेन तत्त्वकरणा
न नमो ब्रह्मणः इत्येतस्य तत्त्वपरत्वयोगाच्चेत्यत्र विस्तरः तुपस्थं हि तत्रैतदेव मे वक्तव्यमाल तत्रगणे।। नमोऽस्तु ब्रह्मणे तु
भ्यमाचारणार्थाय महात्मने।। तन्निराकरणं विशत्यं जनत्वात्मनस्तुनेवाहि। अनिराकरणं ब्रह्मकारणत्वात्विरलनं। अनि
राकरणमेतद्धारणं देशिकोत्तमः। वेदशास्त्रपुराणोक्तप्रसिद्धं कर्णपोशस्तनं। अहं धारयितादेवं मूर्धासं सर्व
कारणं। ब्रह्मविष्ण्वादयो देवाः प्रसिद्धास्तथापरे ताः। ते निराकरणात्सर्वे मत्सुना सर्वदारुणाः। मे निराकरण
त्वेते न हि धार्याः कदाचनानाहं धारयितादेवान्मूर्धासं मज्ञातस्य तत्र। नशान्तुर्वन्ति मां तद्धम मज्ञानां मत्स्वसागरात्

र्थं ममेदं मौलिलिङ्गं मोचात्पुण्यसमाश्रयदिति। स्कान्दे कुमारसंहितायां पञ्चाशत्तमेऽध्याये महातपास्विनं चैव। यतीनां योगि
नां तथा। रुद्रभक्तानां द्विजातीनां शैवानां लिङ्गधारिणां। महापाशुपतानां च भस्मासनव्रतधारिणां। रुद्राक्षजप
रतानां च ब्रह्मण्यानां महात्मनां। पंचाक्षररतानां च मन्त्रिणां त्यागिनां द्विजोत्तमानां सर्वेषामपि सिद्धानां नित्यं देयं गौरी
श्वर। लिङ्गधारणकं नाम व्रतं माहेश्वरमिदं। ये धारणं प्रकुर्वन्ति ते यान्ति शिवमन्दिरं। व्रतं पशुपतं नाम शि
वलिङ्गार्चनं शुभं। यात्कालिकं त्रिकालं वा एककालं महेश्वरं। ये पूजयन्ति विप्रर्षे ते यान्ति शिवमंदिरं। इति स्का
न्दे स्वकार्थी यो दलकाख्यतुसंधेयानीति तैत्तिरीयशाखायामेव। यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्य
मृतात्संबभूव। स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देव धारणो भूयासं। शरीरं मे विचर्षणं। जिह्वा मे मधुमत्तमा। क

२० र्णो भर्गो मूर्तिर्विशिष्टं। ब्रह्मणः कोशोऽसि मेधया पिहित इत्युक्तं मे गोपायेति मन्त्रेणाभिहितदेवविशिष्यति। देवधारणो भूयासमित्यत्र
देवशब्दस्य तं देवतानां परमं च दैवतमिति तस्माद्देवशब्दो वस्तुतः शिवे च परमेश्वरे प्रयोगदर्शनात्। देवतां तद्धारणं विधायक
प्रमाणमाम्नायश्चाप्याम्नायं वा धारणे शब्दस्य कर्तरि ल्युडन्तत्वेन देवं धारयतीति सर्वैस्तत्त्वज्ञैस्तस्य मोक्षार्थं देवधारणो यतो भूया
संज्ञकः इन्द्रः नियमानुग्रहसमर्थः स लिङ्गरूपः शिवः सामान्मेधया स्पृणोतु संयोजयत्विति पूर्वाचार्यैर्व्याख्यातं मन्त्रे दृ
विचार्षिते यश्छन्दसामृषभो विश्वरूप इत्यनुवादे इत्यभिप्रेतं यच्छब्दोपबन्धात् तस्य च पुरोवादसापेक्षत्वेन तस्याभि
प्रायः मध्ये परमात्मा अवस्थित इत्येतत्त्वात् एष पणो विवक्षाकाङ्क्षि पुरोवादः तत्र च पदम् कोशः प्रतीकाशमित्यादिना हृदयं लि
ङ्गरूपं तस्यान्तर्बुद्धिरस्तीति तदन्तर्वर्तिबुद्धिं प्रदर्शनस्य मध्ये महानाग्निरित्यादि परमात्मा अवस्थित इत्युक्तेन तदन्तर्वर्तिबुद्धि

रं प्रदर्श्य परमात्मनः प्रदर्शितत्वेन तथाविधमात्मानं पश्येद् इत्यस्य लक्ष्यमहस्त्यनेनानूद्य धारणो भूपासनमिति विधीयते तथा
च देवधारणः देवस्याशिखामध्यवर्ति परमात्मनो धारणोन्तर्धारणो भूपासनमित्यर्थः इति न लिङ्गधारणोपदेशः किं चात्र
विश्वरूप इति ब्रह्मलिङ्ग प्रदर्शनेन ब्रह्मणः कोशोसीति निरूपपद ब्रह्मपदप्रयोगेण च परमात्मन एवान्तर्धारणोपनी
तेश्वेति चेन्मैवम् तन्मते देवधारणो भूपासनमित्यत्र देवस्य परमात्मनो धारणं मनसानुसंधानमुपासनमिति फलितं
तथा च तस्याः शिखाया मध्ये परमात्मा व्यवस्थित इत्येतस्यैवादर्शनस्य तस्य दहरं विपापं परवेश्मभूतं इत्यादिनानु
पैवादर्शनात् उपासनाविषयत्वविधानेन तस्यैव देवधारणो भूपासनमित्यत्र विधेयत्वाङ्गीकारे पुरोवादर्शनार्थ्यसिद्धि
नैस्यात् न हि पुरोवादप्राप्तमनूद्य तदप्राप्तं किंचिद्विधातुं प्रवृत्तं वाक्यं तन्मात्रमेवार्थमविधाय साफल्यं लभते तत ए

२१ ब्रह्मयदातमस्तन्नदिवानरात्रिर्नसन्नचासच्छिवएवकेवलइत्यत्रतमसःपरोदेवएकोभवतीतिदिव्योदेवएकोनारायणइ
तितमःप्रापकवाक्येतमोऽधिष्ठातृत्वेननारायणस्यप्राप्तेःशिवपदस्यापिनारायणपरत्वमितिपूर्वपक्षीकृत्ययदातमस्
इतिपदद्वयबंधेनतमःप्रापकनिखिलवाक्यानामनुवादत्वात्स्वर्गेविधानंप्रकृतस्यतन्नदिनरात्रिरित्यादिवाक्यस्यापि
शिवपदस्यनारायणपरत्वेपौनरुक्त्यादप्राप्तविधायकत्वेनास्यादितिपुरोवादत्वान्नारायणेयस्यैवलक्षणादिनाशिवपरत्व
मितिस्थितंतितम्॥ कर्णोमन्नादिप्राप्यपदीक्षितैःनचैवंतस्यापिशिवोपासनस्यइतिपुरोवादत्वंतस्यतदुपासनप्राप्तमेवपु
रस्तात्तामसत्वात्प्राप्तस्यतस्यैतस्मिन्नेनमोक्षहेतुत्वंप्रतिबोध्यतइतिवाच्यंतस्यापिब्रह्मणःसायुज्यंसलोकमाप्नोतीतिपुरो
वादतएवप्राप्तत्वेनतदप्राप्तत्वाभावात्कथमपवर्तनतोऽपिदेवधारणामूर्धाक्षमित्यत्रस्थलांगतिधारणाविधानेपुरोवाद

विरुद्धार्थविधानं स्यादिति चेन्नैवं न हि यच्चन्द सामर्थ्यमो विरुद्धरूप इत्यस्य नस्योक्तो वा या मध्य इत्ययमेव प्रयोगो वा इति
नियमः परन्तु सर्वेलिङ्गानां स्थापयतीत्ययमेव प्रयोगो वाद्यः तस्मान्नमेव स्थूललोगलिङ्गधारणो मनुष्यप्रकृत्योः मतस्ये
स्यनेनन तद्भ्रान्तमोक्षरूपं फलं विधीयते अन्यथा वाक्यमेवेदं व्यर्थं स्यात् न चैषापत्तिः पूर्वतन्त्रे द्वित्वविधायकवाक्य
वैयर्थ्यपरिहाराय पंचावर्त्तेववपाकार्थ्ये त्यवघ्नलक्षणोस्वीकृत सर्वेषामर्थ्यपरिहारः कृतः इह तु लक्षणो विनैवदे
वधारणो भूयासद्य इत्यत्र वहिर्लिङ्गधारणे मोक्षरूपफलविधानेन सर्वसामंजस्य कारणे को भार इति न च स
र्वलिङ्गवाक्ये नान्यथासिद्धिरपि सामान्येन विशेषफलविधायकस्यान्यथासिद्धयोगात् नन्वेवमपि ज्ञानं म
हेश्वरादिच्छेन्मुक्तिमिच्छेज्जनार्दनादिति स्मरणेन जनार्दनस्य मत्स्यपायतेन कथं लिङ्गोद्देश्यकमुक्ति

२२ विधानमितिचेन्नज्ञानाच्छिवं शीतिमत्यंतमेति ईशं ज्ञात्वामृता भवंतीत्यादौ च एको ध्येयश्शिवंकरः सर्वमन्यत्परित्यज्येत्या
दिश्रुतिभिरनेतरव्यवच्छेदपूर्वकं शिवस्य मुमुक्षुध्येयत्वावधारणेन श्रुतिस्मृत्योर्विरोधे विरोधाधिकरणन्यायेन स्मृते
र्दुर्बलत्वान्न च समेंद्रो मेधयास्पृणोत्विति मेधाजननयुक्तविधानेन तस्याश्श्रद्धांतर्धर्मत्वादंतरुपासनयांतरं कर्म प्राप्ति
रेव साधितेति वाच्यं स नो देवश्शुभया स्मृत्या संयुनक्त्विति स्मृत्यालिङ्गसंगिनो वत्स पुनर्जन्म न विद्यते पुण्यपदज्ञा
नसंसिद्धिस्थानतो मोक्षमात्रानुपात इति शंकासंहितावचनेन च मुक्तिजनकज्ञानस्य लिंगरूपशिवाधीनत्वात्तस्यैव धा
रणान्वयावसंभावात् अत्र यथा कर्मणैव हि संसिद्धिमास्थिता जनकादय इत्यादिना तीर्थयात्रागंगास्नानादीनां मुमुक्षूपा
यजनकत्वं न स्यात् लिंगधारणस्यापीदं द्वारांतरं गत्वा चेन्निर्हि किं चास्य शरीरधृतलिंगविधायकलेशतोऽपि मविचर्यलोजिह्वा

मेमधुमत्तमात्करणीभ्यां भूरिविश्वत्वमिति वाङ्पदार्थे श्रुतिविशेषपदविधानमपि सार्थकं भवति। रुद्रो मूलापजेड्डुंड्रेनाद्रे
रूद्रमर्च्चयेत्। प्राणलिङ्गसंबंधी सद्रुद्रेनात्र संशयः॥ इति शंकरसंहितावचनेन लिंगसंबन्धादेवाशेषकामेष्टसिद्धा
प्राणेरस्मात्युत्कर्षभेदः सिद्धेः। इष्टलिंगप्रकृतिकगुरुलिंगस्य जलतत्वाभिमानिनो जिह्वाग्रवर्तित्वेन मधुमत्तमत्व
प्राप्तेः भावलिंगप्रकृतिकप्रसादलिंगस्याकाशतत्वाभिमानिनः श्रोत्रवृत्तित्वेन भूरिश्रवस्त्वसिद्धेः यच्चोक्तं विश्व
रूप इति ब्रह्मलिंगस्य निरूपपदब्रह्मपदस्य च परिच्छिन्नलिंगधारणपरत्वे ऽनुपपत्तिरिति तदप्यसम्यक्। लीलया महा
नुग्रहार्थं परिच्छिन्नलिंगस्वरूपाशिवरूपे वाच्य विशेषः। पश्यतिशुश्रां चोऽहं प्रत्यं चोऽहमित्यादिना सार्वात्म्योपदेशेन
जीवस्यैव विश्वरूपत्वावसायात् लिंगं तन्महसंज्ञितमित्यपरोक्षत्वेषां करणात्ः लिंगे निरूपपदब्रह्मपदप्रयोगक

२३ रणेनाश्रनुपपत्त्यभावादिति अन्ये तु श्रुतं मे गोपायेत्यत्र गोपायेत्यनन्वयापत्तेर्देवधारणो मूपासमित्यत्र देवेति पदच्छे
दः तस्य च गोपायेत्यत्रान्वयः तथा चाम तस्य धारणो मूपासमिति प्रासान लिंगधारणे सिद्धिरिति पूर्वपक्षमवलंब्य देह
पदस्य सन्निधिसिद्धत धारणान्वयं परित्यज्य अपरितमिताधिकरणन्यायेन गोपायेत्यत्रान्वयसंभवेन ब्रह्मणः कोशोसी
ति सन्निधिप्राप्त ब्रह्मपदस्य ब्रह्मकोशपरिणामेनान्वयः स्वीकरणीयः अन्यथा धारणपदस्य लोपो गार्थकत्वेन तत्रान्व
तपदवाच्यमात्रस्यान्वयासंभवादिति समाधानमप्याहुः अस्याश्च तेहक्तार्थे। पायेत्युद्धासितानि प्राः आणे लिंग
गसंगिनः॥ व्यापध्वाभिमं मांसं भुक्तिमुक्तिफलप्रदं॥ मंगला लक्षणी वा लिंगधारणे संगवर्जितनमः कुरुते यः आत्म
गजौ वेदहं भवति लिंगं संगमं गतत्वं प्रतरेत्॥ श्रीवमक्कांत्य [illegible] रतिरोन्यतलिंगकान्[illegible] वि प्रानाप्यधयस दा

भस्मरुद्राक्षधारिणः इत्यादिशंकरसंहितावचनानि पूर्वोक्तान्यपि कानिचित् उपबृंहणच्छायापन्नान्यनुसंधेया

नीति॥ विद्यास्तु अविमुक्तरुद्रैकादशिनीश्रुतौ। तत्रैवं चाक्षरीतस्यां शिवःइत्यक्षरद्वयं इति सकलवेदशिरो

मणौ रुद्रैकादशिन्यां॥ यातेरुद्रशिवातनूरघोरापापकाशिनीति श्रुतिरपि रुद्रैरोदनेसंसारदुःखजनितंद्रा

वयतीतिरुद्रः॥ रुद्रमहात्मानंद्रावयतीति वा रुद्रः॥ हेरुद्रः अघोराशिवा तानाकाशिवा सर्वमंगलप्रदायाते तनुः लिंग

रूपशरीरं सा अपापकाशिनी अपापेषु पापरहितेषु काशते इत्यपापकाशिनी लिंगरूपशरीरावच्छिन्ना शिवप्र

षदमसंपन्नमक्तगात्रेयात्र्य इतिपर्यवसितार्थः तत्रजाग्रद्रूके त्यनुसंधेयं नुप हृहिलं चाभिदंताशिरामयो अघो

रापापकाशिनीति यातेरुद्र शिवातनूः॥ यजुषामपि तैयत्माततत्माच्छेदो वा युवर्जितः॥ योलिंगधारी निपतांतरा

२४ त्मानिर्संशिवाराधनकृद्भवितइति ॥ श्रीशिवायनमः ॥ ० ॥ दर्शयित्वा यजुर्वेदे विधितो लिंगधारणं ऋग्वेदेपि तथा कु
र्यान्न बाक्षोरेश्वरं स्मृतः ॥ पवित्रं ते विततं ब्रह्मणस्पते । प्रभुर्गात्राणि पर्येषि विश्वतः अतप्ततनूर्न तदामो अश्नुते शृतास
इद्वहंतस्तत्समाशत इति ॥ अत्र ब्रह्मणस्पदेन लिंगमुच्यते लीनमर्थं गमयतीति व्युत्पत्त्या न दृष्टिकरणत्वात्तस्य पदेशः
तल्लिंगं ब्रह्मणस्त्वेन लिंगं ब्रह्म सनातनं इत्यभिसिद्धं तत्सिवोमशेषो लिंगं तद्ब्रह्मसंज्ञितमिति शिवकरणे चार्ये अपराध
त्वेनेव प्रयोगदर्शनाच्च तस्य पतिरधिष्ठाता तच्छरीरकस्सन्नित्यस्यर्थः तादित्त्यध्याहारः पवित्रपदं विततप
दयोर्लिंगार्थकत्वेको शाब्दभावेन स्वरूपप्रयोगाभावाच्च विशेष्यविशेषणाभावासंभवेन विशेषणद्वयान्वयानुप
पत्त्या विशेष्यवाचकतत्पदाध्याहारस्सूचकत्वाच्चेति तथा च हे ब्रह्मणस्पते लिंगरूप शरीरावच्छेदेन शरीरभावेना

ष्ठितपरमशिवेनेतनवतनब्रह्मपदवाच्यलिंगमहं पशरीरं पवित्रं तु कुरीत्याशु अनुष्ठितकाले धर्मे योग्यं विततं इत्यादिभेदे
न भक्तशरीरादिभेदे न वा बहुविधं प्रभुः निग्रहानुग्रहसमर्थस्त्वं विश्वस्य महत्तानि गात्राणि भक्तशरीराणि वर्ण्ये
विसृज्यापि धार्यमाणानस्य न लिंगरूपशरीरं त्वागमकालंगसंयुक्तोऽसीत्यर्थः ननु ब्रह्मणस्य परमात्मनः त्वया ब्रह्मपदेन स्था
वरलिंगमच्युतेनतनस्थहेब्रह्मणस्तनेशरीरभावेन स्थावरलिंगाधिष्ठितपरमशिवेन ब्रह्मपदवाच्यं लिंगं पवित्रं
श्रद्धशोधनादिनासंस्कृतत्वेन परिशुद्धं विततं स्वयं व्यक्ताव्यक्तपुरुषकृतादिभेदेन नानाविधमित्यर्थः किन्तु स्वादिनिवे
नैवं स्थावरलिंगस्य शरीरधारणासंभवेन प्राग्युक्तार्थकस्य गात्राणि पर्येषि विश्वतः इत्यस्यानन्वयापत्तेः न च तस्या
परिच्छिन्नस्वरूपेण भक्तशरीरसंभवोऽस्तीति वाच्यं तस्य परिच्छिन्नत्वेन ब्रह्मलिंगविरुद्धव्यापित्वस्यैव वक्तव्यत्वे

२५ नमस्कगायत्रीमात्रसंबंधकथनेप्रयोजनाभावादनुपवित्रेइत्येतन्मंत्रस्यसोमदेवतापवित्रत्वानुमंत्रणेविनियुक्तत्वेनकथंलिं
गधारणपरत्वेनयज्ञविनियुक्तत्वस्यतत्परत्वमेवसंध्यावंदनकालीनतत्तद्देवतोपस्थानविनियुक्तमित्रस्येत्यादिमंत्रा
णांतत्तद्देवतापरत्ववदितिचेन्नसोमप्रकरणपठितस्यास्यमंत्रस्यलिंगधारणपरत्वेप्रकरणविरोधस्येतिचेन्नदध्नस्सार्वि
नियोगमात्रस्यपूर्वोदाहृतप्रयोगानवगमाभिन्नब्रह्मपदलिंगपरत्वेभंजकत्वायोगात्स्मार्त्तिचान्यपरतामपिमंत्राणां
मन्यत्रविनियोगः अग्निर्मूर्धादिवःककुदित्यादिमंत्राणांवाचकश्रुतिबलादग्न्यादिपरत्वमेवग्रहयज्ञेभौमादिपू
जायांविनियोगदर्शनात्यज्ञेपुरुषसूक्तेनयजनंद्विश्वतःपाणिमितिदेवतान्तरपरस्यापिपुरुषसूक्तस्यधनदयजनेविनियो
गदर्शनाच्चयज्ञविनियुक्तमितिनियमस्याप्रकृतार्थवाचकपदघटितमंत्रविनियोगस्थलएवनहिपवित्रशब्दस्येदृश

पवित्रार्थकत्वे किंचिन्नियामकमस्तीतिनहि अभिधायकश्रुत्यर्थघटितविनियोगस्य लेशः प्रकृतप्रकाशनेनुकथामितिचेत्

कदाचनस्तरीरसि नेंद्र सश्चसि दाशुषे इत्यादौ इंद्रदेवताकस्य मंत्रस्य ऐंद्र्या गार्हपत्यमुपतिष्ठत इति गार्हपत्योपस्था

नविनियोगेपि मंत्रस्याभिधानश्रुतिप्राप्तेन्द्रपरत्वं नहीयते प्रकृतप्रकाशनेनुलक्षणादिना भवतीत्येवंश्रु

धिकरणन्यायेनावगंतव्यमिति ॥ यदुक्तं प्रकरणविरोध इति तदपि न सोमः पवते जनिता मतीनां जनिता

दिवो जनिता पृथिव्याः जनिताग्नेर्जनिता सूर्यस्य जनितेंद्रस्य जनितोत विष्णोरित्यत्र जडीभूतसोमलतायाः नारायणा

दिजनकत्वासंभवेन सोमपासहितस्सोम इति सोमपदश्लेषमहिम्ना शिवस्यापि प्रसक्तत्वेन वमादायतत्सिद्धि

रिति वाच्यं तितलेन लिंगधारणप्रकरणेस्यापि सोमप्रकरणत्वे विरोधाभावात् किंच स्वरूपं सोमः कपर्दिनः

२६ तिष्ठत्साक्षात्सोमयागस्योत्पत्तिविशिष्टशिवसंबंधबोधनेन रुद्रस्याहुत इति श्रुत्या सोमपदस्थाने रुद्रपदप्रक्षेपेण सोमया
गस्य रुद्रतादात्म्यबोधनेन अहं हि सर्वहविषां भोक्ता चैव फलप्रदः । सर्वदेवतनुर्भूत्वा सर्वात्मा सर्वसंस्थित इति कूर्मपुराणो
क्तशिववचनेन च शिवस्य सर्वहविर्भोक्तृत्वकर्मफलदत्वप्रतिपादनेन सोमयागस्य रुद्रदेवताकत्वनिश्चयात्तत्प्रकर
णपठितस्याप्यस्य मंत्रस्य लिंगधारणपरत्वे प्रकरणविरोधाभावाच्चेन न्यासलिंगतावदुक्तरीत्या प्रकरणाद्यविरोधः
। तथापि पवित्रेण इत्येतन्मंत्रे लिङ्गाद्यभावेन न विधित्वं भवः न वा विधिप्रयोजकरूपसंपत्तिः एतन्मंत्रविहितलि
ङ्गधारणस्यैतत्त्वाविन्नाच सर्वलिङ्गगोस्थापयानीति विधिप्राप्तत्वे नान्यथासिद्धत्वादिति चेन्नैवं तस्मात्पवित्रेण
हि लिंगं धार्यमहैः शैवमनामयमिति वक्ष्यमाणोपबृंहणानुरोधेन प्रभुगीतास्ति पवीषि विध्वत इति मंत्रलिंगेन च तत्

ल्लिंगं धार्यमिति कस्यचित् शंकास्यात्॥ यद्यप्यस्याधिकृतत्वेन विधिप्रयोजकरूपं नास्तीति प्राचीनग्रंथेनोक्तं तदप्यु

क्तं शास्त्रभेदात्। नहि शास्त्रान्तरविहितकर्मणां शास्त्रान्तरेणाप्यसिद्धिसंभवः तथा सति यजुश्शाखाविहितकर्म

णामेव केषांचिदृग्वेदविहितत्वे न तद्विधायकवाक्यानां प्रवर्तकत्वानुपपत्तेरित्यलं प्रसक्तानुप्रसक्त्या एवं पवित्रे

तद्धस्ताग्रपर्वणि विशिष्टतद्रूपत्वेन लिंगधारणं तस्मात्सर्वं चविधायानेकश्रुतिविहितत्वेप्यनाश्रयाहितफलभा

ह्लिंगधारणमकर्तव्यमिति केषांचिज्जडानामाशापिशाचिकोद्धाटनार्थम् भगवती श्रुतिरेव मुक्तानुपायान्त

रमवच्छेदसूचनाय व्यतिरेकमुखेन लिंगधारणस्य प्रयोजकत्वमभिवदति अतप्ततनुर्नतदामो अश्नुत इ

ति॥ तस्माद्वेधामनुक्रिया। दीक्षात्रयेण निर्दग्धपापंजरणतनुर्यस्य सो न भवतीत्यतप्ततनुः दीक्षात्रयरहितः

२८ श्यामोऽपरिपक्वांतःकरणस्तत्परशिवस्वरूपं नाश्नुते। एवं च लिङ्गांगसंगिनो वत्स पुनर्जन्म न विद्यतेति शंकरसंहिता
वचनानुरोधेन दीक्षात्रयमेव मुक्तावस्थाधारणकारणमिति फलितार्थः॥ रामानुजमतानुयायिनस्तु पवित्रे चरणे चक्राङ्कि
तिकोशप्रवेश्या पवित्रपरमचक्रार्थकं ब्रह्मणानरस्य न ब्रह्मपदं वनु भुवो ब्रह्मादि धाइतस्य पतिः नारायणो ब्रह्मा जायत
इति श्रुत्या जनकतेनाधीश्वरः तथा च हे ब्रह्मणस्पते च तनुर्भुवो यस्मात् दक्तेपवित्रं चक्रं वितनं प्रभुः निखिलभुवननिया
मकत्वं गात्राणि भक्तांगानि पर्यैषि प्राप्नोषीत्यर्थः अए वा तप्ततनुर्नैत दामोऽश्नुत इत्यप्यन्वर्थकं तप्तावङ्कितस्तप्तः चक्रे
ण पूर्वरूपप्रावृत्ति पूर्वकरूपांतरप्रादुर्भावात् तनुर्यस्य तादृशो न भवतीत्यतप्ततनुः दीक्षेल चक्रधारणरहितः तत्
नारायणात्मक परब्रह्मस्वरूपं आमः अपरिपक्वांतःकरणो नाश्नुते न प्राप्नोतीत्यर्थः इति आचक्षुः तदप्यश्रद्धे

पुं यद्यपि पवित्रं चरणं चक्रमिति धूर्त्तवैष्णवकल्पितकोशत्व एव विवादः तथापि तुष्यतु दुर्जन इति न्यायेनाभ्युपेत्य
निरुक्तिपते मंत्रे चक्रधारणविधायकाभावात् न च गात्राणि पर्येषि विश्वतः इत्येतद्विधायकं तस्य विष्णोरेवमुक्तो
गतसम्बन्धविधायकत्वात् ननु पवित्रं त इति विष्णुसंबन्धि चक्रमभिधाय गात्राणि पर्येषि विश्वतः इत्यनेन धारण
विधानान्नारायणस्य धारणोपपत्ति ध्यानदीयचक्रस्येतत्स्थिति चेन्न मे वैविकल्या सहत्वान्न तथाहि ॥ चक्रस्य तल्लां
छनत्वेन धायेत्वमुत तत् स्वरूपत्वेनाहोस्विन्नारायणाश्रयत्वेन वा ॥ नाद्यः ॥ कौमोदकी गदा खड्गो नंदकः कौस्तु
भो मणिरिति कोशावगमिततल्लांछनानाम् बहुशस्त्वेन तस्यैव धार्यत्वे विनिगमनाभावात् ॥ न द्वितीयः ॥ त
त्स्वरूपत्वेन तद्भेदस्य ध्यौ चक्रनारायणयोर्भेदगर्भितलांछनि लांछनभावासंभवेन तद्बोधककोशविरोधापत्तेः ॥

तृतीयेपि ॥ अनंतं वै हि अनंतत्संर्वं व्याप्य नारायणः इति श्रुतिबोधितसर्वगतत्वमिति भावेन तदाश्रयत्वमुत शरीरिभावेन वा ना
रायणः पक्षः शोभां कलयते · अनंतयोगिभावेन नारायणोऽस्य सकलपदार्थव्याप्तिलेशे सर्वेषामपि धारणी यतामयतेः ॥ नोत्तरः प
क्षः शरीरिभावेनास्थितत्वांगीकारे सालग्रामवैष्णवपूजनाम्नादिविग्रहालयप्रतिष्ठितत्प्रतिमालिंगवाहुमूलधार्य
चक्रादेरपि नारायणोऽस्य पूजानिवेदनादिकारणापत्तेः ॥ यदुक्तमनंतव्रतं तु नैतद्यमा अमृतत्वं न न तत्र स्थितिरिति तदपि नि
र्युक्ति लोकारिवर्षधारणमेवानुकरोति ॥ ब्राह्मणोऽस्य तनुर्हिंसा सर्वदेवमयमात्मनि ता ॥ सो चेत्संतापितां राजन्रक्तं
वक्षाम्यस्यपातकं ॥ गंगास्नानरतो वापि हयमेधरतोपि वा । चक्रांकिततनुं दृष्ट्वा पश्येत्सूर्यं जपेन्नरः जपेच्च प्राहकं स
कमनस्थाशैवं व्रजेत् ॥ भुजाग्रे यान्ते विप्रस्य चक्रांकितो यदि । वेदाग्निहानिमर्यादोपि दहस्याशन्नरं कुलाग्निस्यादिय

र्थेशास्त्रवचनैस्तत्समुद्रधारणस्यानिषिद्धत्वेन तप्तरत्वेन व्याख्यानासंभवेस्मदुक्तरीत्यैव व्याख्येयत्वात् ॥ किंवा
स्यमंत्रस्य सोमसूक्तकरणे पठितत्वस्य चक्रधारणेपरत्वे सूक्तकरणेविरोधश्च ॥ नचास्मिन्मते तदापत्तिः ॥ पूर्वमेव निराकृ-
तत्वात् ॥ यदप्येवमतस्यप्यत्र प्रतनुरित्यस्य हृषवस्थानगत्या चक्रसंतप्तशरीरार्थकत्वमेवांगीकरोषि तदास्त्रकारे
विष्णुवाचकः इति स्मरणेनस्याप्यविष्णवे विषयत्वर्थोपि निपातात् ॥ तप्तातनुर्यस्यासौ तप्ततनुः ॥ एवंभूतः आमः अप-
रिपक्वोतः करणास्तत् तस्य ब्रह्मस्वरूपं नाश्नुते ॥ परं तु शृतस्पाकः इति धातोः शृतास्तत्प्रासंतः इत्तापजस्यं कि-
णत्वे हतेः तक्षिणमेव समशनप्राप्तुपनीत्येवार्थः स्यात् ॥ प्रागुक्तनिषेधानुरोधात् । अथैवमपि पवित्रपदस्यको-
शप्रतिपाचक्रार्थकत्वमावश्यकं तथापि तनपाविआदिबोधः ॥ हृदयंगमपहाकेत्वादिति चेन्न ॥ सति बाधके

२९ कोशस्य शक्तिग्राहकत्वानंगीकारात्॥ अत एव नीलो घटश्शुक्लः पट इत्यादौ गुणे शुक्लादयः पुंसि गुणिलिंगास्तु तद्वती
ति कोशेन नीलादिपदस्य रूपवाचकत्वेपि समानविभक्तिकपदस्थले भेदसंसर्गबोधासंभवेन रूपवति शक्त्यंगीकारे गौ
रवेण च निरूढलक्षणैवांगीकृता॥ हृदयं गाणपहारकत्वमपि हस्तेर्थो बाधस्थलएव॥ अन्यथा पंकजमानयेत्यादौ प
द्मबोधे यौगार्थकुमुदबोधो न स्यात्॥ प्रकृते तु कदिशा चक्रार्थकत्वं बाधितमेवेति॥ एतेन तप्तं चक्रं द्विभुजे धा
र्यमिति विधिः न एव चक्रधारणसिद्धिरित्यपास्तं॥ पक्षमानशाखोयायाममाख्यानेन पाठादर्शनात्॥ तस्य श्रुतित्व
एव विवादात्॥ यदि च विप्रकीर्णशाखोक्तादादिकमभ्युपेत्य तथात्वमंगीकरोषि तथापि न तेन तत्सिद्धिः॥ प्रागुक्त
विकल्पपराहतत्वात्॥ निषेधशास्त्रविरोधाच्च॥ सर्वे वा क्षमिति न्यायेन भुजद्वयोद्देशेन चक्रधारणरूपविधाने शं

वेधारणा मिथ्यादृष्टिरेतेनुमेऽजेविप्रो विप्रियाहेमुदर्शनं । समेषां वेविष्णीयादिति ब्रह्मविदो विदुरिति वचनवि
रोधः आचारविरोधश्चैतल्लमसदावेशेन ॥ गृहचरणोस्तुत्र ब्रह्मणोऽस्पेन इत्याने न विष्णाधिकोऽह्नद्रो महर्षिः । हिरण्य
गर्भं जनयामास पूर्वं । यो ब्रह्माणं विदधाति पूर्वं । इत्यादिश्रुतिभिर्हिरण्यगर्भजनयितृत्वेन प्रसिद्धः परमशि
वो विधीयते । पवित्रपदं लिंगार्थकं सर्वलिंगाग्र्यं स्यात् यपपत्तिपाणौ मंत्रे पवित्रमित्यत्र लिंगपदसामानाधिकर
ण्यात् ॥ लिंगपदसमानाधिकरणपवित्रशब्दस्य कथं लिंगार्थकत्वमिति चेन्न ॥ वज्रं यथा मास्तिकयावकीरणे
मिति रामायणे श्लोके व्याख्याने । वज्रो वा अश्मासजंप्रमिति प्रकृतावाज्यपदसामानाधिकरण्येन वज्रपदस्य
संस्कृताज्यपरत्वमिति मिमहेश्वरकीर्त्यादिभिरंगीकृतत्वात् ॥ न च प्रकृते पवित्रपदस्य मंत्रे पदसामानाधिकर

लोपेन लिंगपदसामानाधिकरण्यमिति वाच्यं ॥ मननात्त्रायत इति व्युत्पत्त्या मंत्रपदस्यापि लिंगार्थकत्वात् ॥ वाच्यवा-
चकरूपेण द्विधा मंत्रः प्रकीर्तितः ॥ वाच्यश्चैव तु रूपस्याद्वा वाचकश्चापरमार्थशिवः ॥ इति नित्यकेष्व ॥ तथा च ॥ हेमस्तम-
स्तेः परमशिव॰ ते॰ तव । पवित्रं ॥ लिंगं । वित्तं तेष्टादिभेदेनानेकविधत्वाद्धि स्तुतेः प्रभुः अखंडजगदेकप्रि-
यामककल्पगोत्राणि ॥ मक्रशरीरगतो विश्वत्तस्य संख्या त्वपर्यैषि सर्वांगेष्वप्यसर्वैच सर्वदा सर्वतो मुखं लिंगरूपदेशेन
सुप्रतिष्ठितयात्मनी स्यात्स्पृह एकमेव परं लिंगमंगेऽस्मिन् सुप्रतिष्ठितं । सर्वतो मुखं समाप्नोतीनाम त्वपश्चिमयात्मना ॥
इष्टलिंगं तु वह्न्यांगे प्राणलिंगं तथांतरे ॥ भावलिंगं तथैवात्मन्येवमात्मांगे सुप्रतिष्ठितं ॥ हृदयांगे महालिंगं श्रोत्रांगे तु
प्रसादकं ॥ त्वगंगे चरलिंगं च दृगंगे शिवलिंगकं ॥ जिह्वांगे गुरुलिंगं स्याद्घ्राणासिकांगे तथैव च ॥ आचारलिंगमध्रा

तं सुप्रतिष्ठितमेवाहि। यथा ज्ञानेंद्रियांगेषु क्रमाल्लिंगं प्रतिष्ठितं। तथा कर्मेंद्रियांगेषु क्रमाल्लिंगं प्रतिष्ठितमिति वातुला
गमोत्तरभागेषु भवसुप्रसिद्धवचनरीत्या समस्तमकांगाम्नघटितघटनपटीयांस्त्वमेव व्याप्नोषीत्यर्थ इति प्राहुः। अन्ये
तु पवित्रं ते विततमित्यत्र विततपदं तनुशब्दवत्तनु विस्तार इति धातुनिष्पन्नत्वेन शरीरार्थकः ब्रह्मपदं लिंगा
र्थकं तथा चाहे ब्रह्मणस्पतेः लिंगाधिष्ठानरूपपरमशिव। ते विततं लिंगरूपशरीरं पवित्रं = शुच्यशुचिकालेपि
धारणयोग्यं प्रभुः त्वादृशा लिंगशरीरको भुक्तिमुक्तिफलप्रदाता भक्तशरीराणि पर्येषि व्याप्नोषि मा लिंगशरीरा
वच्छिन्नः परशिवो भक्तगात्रेषु धार्य इत्यक्षरार्थ इत्याहुः। गुह्यमन्तेतियान्विशेषः उद्देश्यवचने पूर्वं विधेयस्तत
तः परमिति मिश्रकारिकानुरोधेन पवित्रं ते विततमित्यत्र पवित्रपदस्य लिंगार्थकत्वे विततपदस्य व्यापि

त्न-नत्वस्य विधेयत्वेनोद्देश्यविधेयवाचकशब्दयोः पौर्वापर्यं सिध्यति॥ विततशब्दस्य लिंगार्थकत्वे पवित्रस्य विधेयत्वेन वै
परीत्यमिति उक्तार्थानुरोधेन वाक्ये मंत्रस्योपक्रम्यमाणत्वमप्यालिलिंगधारणे। कीटभ्रमरयोगेन भ्रमरो भवति ध्रुवं। मान
वा शिवयोगेन शिवो भवति निश्चयः॥ ब्रह्मविष्णवादयो देवा मुनयो गौतमादयः॥ धारयंति सदा लिंगमुत्तमांगे वि
शेषतः॥ इत्युपक्रम्य ब्रह्मेति लिंगमाख्यातं ब्रह्मणस्पतिरीश्वरः॥ पवित्रं तद्धि विख्यातं तत्संपर्कात्तनुः शुचिः॥ अ
गित्याह पवित्रं ते विततं ब्रह्मणस्पते तस्य स्पर्शात्तलिंगधारी शैवमतानुमपि। अतप्ततनुर्न हि वै आमस्संस्कारव
र्जितः। दीक्षयारहितस्साक्षान्नाश्नुते लिंगमुत्तमं॥ पः कणैतितपः पूर्वैसिंतप्ततनुर्नहृच्यते। परिपक्कोविमोक्षाय सोश्नु
ते लिंगधारणं न करोति तपः पूर्वैस्तोनमतनुर्नहृच्यते॥ अपक्को यो विमोक्षाय नाश्नुते लिंगधारणमिति॥ अतत्र

ह्येति लिंगमाराध्यानन्दितिनिष्ठिविध्यानन्दितिधार्यं शैवमिति चोक्तार्थोपोद्बलकमिति स्पष्टं ॥ किंच ॥ इतिहासोपि
नारीश्योगरूढ्या शास्त्रवेदिना ॥ धारयेच्छांकरं लिंगं शरीरे प्राणसंयोगतः ॥ लिंग स्वधारणं पुण्यं सर्वपापप्रणा-
शनं ।४। स्त्रादृतमं निर्मितं सर्वै गणमार्यैर्विशारदैः ॥ इष्टलिंगमिदं साक्षाच्छरीरे परिहारकं धारयेद्वधानेन
शरीरे सर्वदा तु यः ॥ धारयेद्यत्नेन लिंगं नेक्षुहस्तार्पितं ॥ प्रमादात्पतिते लिंगे प्राणानपि परित्यजेत् ॥ इत्यादि
शिवरहस्ये हि नास्ति ध्यानं शिवात्परमप्यादिवचनान्युक्तार्थोपोद्बलकान्यनुसंधेयानीति । अत एव देवेन केवलं पवि
त्रेत इति मंत्रेणैव न तत्सिद्धिः ॥ किं तु पवित्रहस्त इति मंत्रांतरेणापि तद्वक्ष्यति ॥ अथ पंचमहस्तो भगवानपंचमेभाग
वतः ॥ अयुग्मविग्रहमेषजोय ६ ॥ शिवाभिमर्शनः ॥ अयं मातृकास्वरूपं पितृनाम्नायं जीवात्मस्वरूपात् । इदं तद्ब्रह्म

३२ पेतां पुत्रं धवेहि निरीहेति ॥ अत्र भगवच्छब्देन परमेश्वर एवोच्यते ॥ अथैनं भगवंतं कुमारः प्रपच्छ ॥ अथ काला
ग्निरुद्रं भगवंतं सनत्कुमारः पप्रच्छेत्यादिश्रुतिषु इति लिंगं स्तूयमानस्तु भगवान्वृषभध्वज इति हरिवंशादिषु चाशि
वेन बहुप्रयोगात् ॥ एवं चायं भगवान्लिंगरूपः शिवः सोहन्त्वः हृत्सगतः सोऽसत्त्वमंघ्रिञ्च पार्श्वः भगवन्तरस्वर्थः
॥ ननु हृत्सगतो भगवानिति वक्तव्ये हृत्सदृष्टक्तिः कथमिति चेन्न ॥ आदित्यो भगवान्सूर्यो नीलग्रीवो विलोचनः ॥
अधीयते सहस्रांशुस्सा भगाध्वर्युहोतृभिरित्यादिस्मृतिगणवचनेर्य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते इत्यारभ्यां
विकापतये उमापतये पशुपतये नमो नमः इत्येतेन तैत्तिरीयवचनेन ॥ सोऽरमंडलमध्यस्थो सोऽवसंसारभेषजं ॥ मंडलांतर
गतं हिरण्मयं भ्राजमानं वपुषं शुचिस्मितनामित्यादिवचनैश्चादित्यगतत्वेन प्रतिपादिते परमात्मनि शिवादित्यसौर

विभाज्यसंबंधस्योतनायादिस्थगतत्वात्त्रिलोचन इत्यनुक्त्वाऽदिस्थत्वाल्लोचन इत्युक्तिवत्पंचमे हस्तो भगवानित्यत्रापि
हस्तशिवलिंगयोरविभाज्यसंबंधसूचनाय हस्तगत इत्यनुक्त्वा हस्तो भगवानित्युक्तमिति वक्तुं शक्यत्वात्॥ एवं
चोभयोरविभाज्यसंबंधानुपपत्त्या संस्कृत्य सगुरुहस्तादेर्न्न घडध्वन्यासपूर्वकं॥ वामहस्तगते लिंगे सावधाने
न पूजयेत्॥ धारयेद्दक्षहस्ते हस्ताद्वै लिंगाकारं शिवं सदा॥ तस्य हस्तास्थितं विद्धि मम सर्वं सपदं पदे॥ इति
वातुलवीरागमाद्युक्तप्रमाणाद्विवचनानुरोधेन च हस्तादेर्धारणे लब्धे हस्तशिवलिंगसंबंधस्यावि
६५ न्यायेन अग्नीषोमीयपशुवाक्यस्येव वचनेन विधायकवचनानां बलीयस्त्वेन दहनविधायकवाक्यानां न हिं-
स्यात्सर्वा भूतानीति वाक्यस्याग्नीषोमीयपश्वतिरिक्तविषयत्ववद्दहनाख्यत्वाविशेषव्यतिरिक्तविष-
यत्वेन संकोचः कार्यः। नचोदाहृतश्रुत्या बोधितत्वेन तस्य यतिविषयत्वमिति वाच्यं सर्वत्राग्नित्यादौ शरी-
रमित्यादौ यतिवाचकपदाभावेनोभयत्रत्वेन न्याय्यानुरोधेनोभयसाधारण्येन वचनेन विधायकश्रु-
तीनां संकोचासंदिग्धत्वादुदाहृतश्रुतिस्मृत्यादिदेहलिंगादि ब्राह्मणबोधकपदसत्त्वाच्चेति। किं-
च। भारतेऽनुशासनपर्वणि गौरीं प्रति शिववचनेन दहनत्वेन नयोर्द्वयोरपि विहितत्वेन वेदतुल्य-
भारतबोधितत्वेन तस्य लिंगधारिब्राह्मणविषयत्वमावश्यकमेव तथाहि ॥ स्वभावमरणं नाम तत्

दात्मेच्छया भवेत्॥ तदात्मतानां यत्कार्यं तन्मे शृणु यथा तथा॥ भूमौ संवेशये देहं। नरस्य विनशिष्यतः॥
निर्जीवं स्पृशेद्यावत्तस्य यो वासनानुकलेवरं। मात्स्वगांश्रे रलंकृत्य छत्रलौन नव ब्राह्मिनि॥ स्मशाने दक्षिणो दे
शे विन्यासो प्रदहेत्ततः। अथवा निक्षिपेद्भूमौ शरीरं जीववर्जितमिति॥ नचात्र दहनस्य त्राम्हणविषयत्वेन
नस्यज्ञात्मत्वविषयत्वमिति वाच्यं विनिगमकाभावेन वैपरीत्यापत्तेः॥ नच दहनस्य श्रौतत्वेन तदेव विनिगम
कमिति वाच्यं खननस्याप्यनेकस्मृतिस्मृत्यादिबोधितस्य पूर्वक्तप्रमाणादित्वात्॥ लिंगं शिवं भवेत्तस्ये च मृते लिंगसंयो
गश्चाश्रयः॥ तस्माल्लिंगांग संयुक्तो योपि स्यात्सोत्याश्रमी भवेत्॥ प्रथमः खननो पायो द्वितीयो दहनात्मकः॥
तृतीयो ऽदर्शनोपायस्तद्देहस्य कृमिच्छनां स्पर्शनमतिश्रेष्ठमवियोगांगलिंगयोः॥ तथैव खननं श्रेष्ठं

विशुद्धेऽप्यभिधीयते ।। तयोरभावे दहनं शिवाग्निकर्पूरयोगवर्त्तिकानुलोमतस्तन्मात्रानुरोधेनेति । अथैवमुक्तप्रमाणस्था
लिंगांगित्वाम्रणानां सर्वेषामपि दहननिषेधजातपुत्रःकृष्णकेशोऽग्नीनादधीत । अथैनमर्थं विद्वानित्या
दिवाक्यविहितसाधनत्वेऽपन्नस्य ब्राह्मणमात्रस्य तन्मतेनं - वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तप
सानशनेनेति श्रुत्यापादितब्राह्मणवेदसाधनीभूतपञ्चस्याविकस्य कर्तव्यत्वेन कस्याप्यात्रिमह्योज्जगीतमस्याम
हर्षेपरस्यदाहनलिंगपुराणवचनविहितलिंगधारणं वतामेवकश्यात्रिभ्यापादीनां शिवपुराणेवापवी
यसंहितायां - जगल्लिंगधारणं निरूपणप्रस्तावे - आहिताग्नीस्तप्रभृतिपानादाधुनिकानामपिकेषां
चित्पूर्वशैवानामुक्तसाधनवतामाहिताग्नीत्यदर्शवानात्नेषामपिदहननिषेधप्राप्तावाहिताग्निमिदं हन्ति

यज्ञपात्रैर्वैतिकल्पसूत्रविरोधस्तेन चाहिताग्नीनामग्निमात्रस्याप्रहाणे वैतानाग्निहोत्रपात्रैस्सदहनविधानादि
तिचेन्नैवमेषाः ॥ एवंवृत्तां सवर्णां स्त्रीं द्विजातिः पूर्वमारणीं ॥ दाहेदग्निहोत्रेण यज्ञपात्रैश्च धर्मवित्ताभा
र्यायै पूर्वमारण्यै दत्वाग्नीनन्त्यकर्मणि ॥ पुनर्दारक्रियां कुर्यात्पुनराधानमेव चेति मनुस्मृतेस्ता यज्ञपत्न्याः
प्रथमं मरणप्रसक्तौ वाग्नीयाग्नीहोत्रपात्रैस्सतस्या दहनविधानेन द्वितीयविवाहात्पूर्वमेव पत्न्यन्तरोपेमर
णप्रसक्तावग्निहोत्रपात्राणां पूर्वविनियुक्तत्वेन तादृशयेकल्पसूत्रविहितयागीयाग्निहोत्रपात्रकारण
कदहनस्यानिसत्वसीकारात् न च कल्पसूत्रे यज्ञपात्रैर्वैतिविकल्पविधानादरण्यादि अतिरिक्तपात्राग्निहोत्रे
जीयादहने परागोमथनयोस्तेन पत्न्यन्तरो मरणप्रसक्तौ पुनराग्निमुत्पाद्यारण्यादिनासहदाहः किं यतश्चि

६८ वाक्यं यज्ञपात्रैः स्वधर्मे विदितिमनुस्मृत्या किंचित्याज्ञवल्क्यातिरिक्तपात्रैर्दहनाप्रतीतेः तथापि यागी पात्री होत्रे
ण यज्वनो दहनाभावेन कल्पसूत्रविहितकर्माणि त्यक्तस्यापरिहारश्च किंच प्रजापत्यां निरूप्येष्टिं सर्ववे
नसं दक्षिणां दत्वात्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहादिति मनुस्मृत्याऽहिताग्नेर्विप्रस्य तुर्याश्रमसौ
कार्येण यसमवधाने प्रजापत्येष्टिं निर्वर्त्याग्नीनात्मन्यारोपणं कृत्वा स्वगृहात्प्रव्रजेदिति विधानेन तस्य च
सर्वकर्मनिवृत्तस्य ध्यानयोगरतस्य चेत्यादिपूर्वोदाहृतवचनेन दहनतद्विधयोरप्यनित्यत्वाच्च न च संन्यस्त
यज्वनो दहनाभावेऽपीतरस्त्री देहावसानपर्यन्तं पात्रापोषे गृहस्थावस्थानकालीनपात्रैः सह दहनं हि यतस्त
वेति वाच्यं आहिताग्नेरनग्नेर्दहनीतिश्रुतपुंलिङ्गतानिर्वाहायाहिताग्निपदस्य यज्वपरत्वेन तस्य दहनाभा

वैमानिकस्यत्वापरिहारेणनचलिंगव्यत्येनाहिताग्नीषुदेवसमन्नीपरत्वमपीत्विक्षीयतइतिवाच्यं॥
यागीयानीहोत्रपात्रोपकरणेकदहनस्यतस्योत्स्याभावेनकल्पसूत्रविहितकर्मणोऽनिष्पत्ताव
श्यंभावान्नदेशकालवैपरीत्यादिनापद्गतपात्रविच्छेदेनतस्यहभावेनापीदहनाभावात्।सत्यस्यप्यूज्याऽनि
होत्रात्मारोपणसमकालमेवपात्राणांप्रक्षेपकदहनकृत्वासन्यस्यस्त्रीविपक्षेनसन्चोदेहावसानपर्यंतंयंत्र
पात्राभावाच्चेति।अपीचगृहस्थस्तुयदापश्येद्वलिपुःपलितमात्मनःअपत्यस्यैवचापत्यंतदारण्यंस
माश्रयेतसंत्यज्यग्राम्यमाहारंसर्वंचैवपरिच्छदं॥पुत्रेषुभार्यांनिक्षिप्यवनंगच्छेत्सहैववा॥अग्निहोत्रं
समादायगृह्यंचाग्निपरिच्छदं॥ग्रामादरण्यंनिःसृत्यनिवसेन्नियतेंद्रियः॥वैवनिकंचगृहस्थादेवी

६८ होत्रं यथाविधी विसृज्याय ज्वलनस्य रक्ष्य स्पवागृहस्थस्य ब्रह्मचारी गृही भवेद् गृही भूत्वा वनी भवेद्वनी भूत्वा प्रव्रजे
दित्यादि श्रुत्यक्रमविधायकवाक्यपरिशीलनेन वानप्रस्थांश्रमसमयं वैधेत्वप्रमाहितवानित्यो [illegible] जाय स्त्रोषिद्धकला
त्रमन्यन्निक्षिप्यापत्यपुत्रादेर्भार्यानिवेश्यारण्यप्रवेशं कुर्यात्। यद्वा वानप्रस्थस्याली होत्रादिकर्माधिकारस्य
विद्यमानत्वेन वैतानाग्निहोत्रपात्रादिकं परिगृह्य भार्यया सहैव वनं गत्वा वन्यफलैरेव जीवमानोऽग्निहो
त्रादिसकलकर्मानुष्ठानमाचरन्नेव वनि वसेदित्यभिहितत्वेन वानप्रस्थस्य यज्वनो देहावसानप्रसत्कार
वानप्रस्थयोगीनं च लिंगै कृपे भिक्षुकयतिमित्यादपुदाहृतपातातपस्मृत्यानस्मत्वेन नविधामे
नकलस्मृत्रविहितयागीयानाहोमबाचकगोकदहनस्यानिलत्लाभावात्। नचतस्येद्धत्वाभावे

णीत सत्नी देहावसानपर्यंतं पंचोत्रादिकं संस्थापयेत्संसह क्रियत इति वा अपत्नीसत्वभावे नैवाश्रमाधिकारे पत
त्सापीवानप्रस्थे देहनापोगात्वाहिं वैतान पात्राणां का गतिरिति चेद् गृहे त्रेण पात्राणां प्रत्यकं दह
नं कृत्वा वानप्रस्थ पत्नीपरिरक्षणेन नमेव कार्यमिति गदहाएण ॥ अनुवानानप्रस्थ प्रत्यपाः ३५ नं यजमाना
त्विकमेवैतानानाम्नभावेन पात्राणां देशकालवैपरीत्येन विच्छेदे तु लौकिकानामग्निनां दहने यो सूत्रविहित
कर्मणि नित्यत्वस्य वच्चने यापि तत्वमेव ॥ ननु कल्पसूत्रविहिताग्नीदहनस्य श्रौतत्वेन कल्पवत्वान्त्यस्यानाद्यपा
दिस्य सावस्य नित्यत्व कथनं युक्तमिति चेन्न । श्रुतावपि वस्य नित्यत्व बोधनान् तथा च येनादग्ध्या येऽग्निन
नादग्धा धाये वा जाताः ममकुले मम दत्तेन पिंडेन तृप्ता यांतु परां गतिमिति पिंडप्रदाने श्रूयते स्मवचान्नि

६८ दग्धकोटिप्रविष्टत्वसाहित्यान्नीनामप्याह ॥ न चात्र न्यूनद्विवर्षिकं बालं निखनेनेनु दाहयेदिति बालानां दहन
निषेधाल्लेखामेवाग्नीनां कोटिप्रवेश इति न सूत्रविहिताग्निदहनित्यत्व मिति वाच्यं । अर्धसंस्कृतप्रमीतापेत्याग्नित्यो
याः कुलस्त्रियः दास्यादिविक्रियमन्नं ताम्बेश्वृग्गृह्ककर्मेति तेषां पृथक् कुल्लत्वविधानात् नापीपवीत्वर्णाणां मनिग्न
दग्धकाष्ठप्रवेशः न तस्य दहनं कार्यं न च पिंडोदकक्रियाएकादिश्चैन कर्तव्यं सन्यस्तानां कच्चनेति । पतितकस्य
सापत्नीश्वर्णाणां पिंडप्रदाननिषेधात् ॥ नापीजातसंवर्णाणां प्रवेशः शूद्राणां । वेदमन्त्रेणविधानायोगेन यजमा
नकुले दासादास्येन काष्ठेण ॥ इत्यादिपुराणवचनैरेव वृत्तिविधानादिति । अतः परिशेषप्रमाणेन ।
देशान्तरे विजनप्रदेशमरणानामपुत्रकाणां अर्द्धपभावे नाग्निसंस्काराभावात् वनायजमानकुलोद्भवा

नामाहिताग्निनामनाहिताग्निनां वा गृहस्थानामरण्यादिप्रविष्टानां देहावसाने खननक्रियया मुक्ता
नामाहिताग्नीनां वानप्रस्थानां चानग्निदग्धकोटिप्रवेशः कार्यः इति एवं च कल्पसूत्रादिविहिताग्नि
दहनस्य निरसनाभिप्रायो लिंगाद्याशी द्विजानां मृदान्तानेकश्रुतिस्मृत्यादिकं देवेन खनननक्रियाविधाना
दुहिताग्नीनामपि वेषां देहावसाने पूर्वे काले प्राजापत्येष्टिं कृत्वा मन्त्राग्निनाशेष्यमतानां खननक्रि
यैव कर्तव्या वस्तलीनामप्यवसाने पात्राणां पृथक् दहनं कृत्वा खननमेव कर्तव्यमिति स्मृतिसंग्रहे तत्रांकिं
च मार्गशैवानां पूर्वशैवानां दहनकरणे खननाकरणे च प्रत्यवायविधानादाहिताग्निनामनाहिताग्नि
साधारण्येन वह्निविषये दहनविधायकसकलवाक्यानामपि संकोच एवं अंगीकरणीयः तदुक्तं सदानंदे

पतिषदि॥ शिवलिंगधरं विप्रं विपन्नं तु न दाहयेत्। यदि वा दाहयेल्लक्षब्रह्महत्याव्रतमवेन्द्र इति॥ स्कांदे मंदन
लिंगांगिनो देहमज्ञानाद्दहते यदि। शिवालयसहस्राणां दाहदोषमवाप्नुयात्॥ यदि च्छेदं दहनं शिवांगो वं
निवेदयेत्। तत्रापि लिंगकायस्य दहनं तु विवर्जयेदिति॥ पद्मपुराणे॥ सर्वाश्रमाधिकारैकेन भवेद्व्यस्ताश्रमी
द्विजः। लिंगांगी यदि वा मुक्तो दग्धुं नार्हति कर्मणा। वायवीयसंहितायां॥ षडध्वशुद्धिदीक्षाविधिवत्संस्कृतांगो वा
म्रियते यदि यत्र तत्र नामी दहनस्य दहनं कुर्याद्दोषो देहि कर्मेति॥ शिवधर्मपुराणे अध्याये प्राणलिंगसंलग्नो लिंग
प्राणो विप्रुन्मृते शरीरदहनाल्लक्षनरके कालमक्षयां भस्मोद्धूलितसर्वांगमिमापादवन्मस्तकं रोमरोमम
वे लिंगवद्देहं दाहवर्जयोग्यानित्यष्टकायस्यतात्मलिंगोष्ठलिंगयोः॥ संयोगान्मोक्षकलिवमगु

सोऽसावनुग्रहीतात्मा पदं गत्वा शुभं वहेदिति । शिवेनानुलिंगिनः ॥ तद्देहदहनाद घोरं रौरवं नरकं व्रजेत ॥ प्राणलिं
गवतां शुभं लिंगाश्रयवतविनो ः । प्राप्तमरणकाले तु न कुर्याद्दहनं बुधः ॥ अज्ञानाद्दहने कल्पान्नरकं या
ति गच्छतीति ॥ वीरागमे ॥ कोटिशो वा लयं दग्ध यः शिवभक्तदेहं । यादि दहनं ज्ञानयोगेन वहमहलाम
वाप्नुयात् लिंगदेही शरीरस्य लिंगसंस्कारवर्जिव ॥ कुर्याच्चेद्दहिसंस्कारमुभयोर्नरकोऽस्त्यथः ॥ यप्रा
प्यलिंगनिष्ठस्यो निष्ठयैव वेतुलिंगिने ॥ तद्देहदहनाद घोरं रौरवं नरकं व्रजेत् इति ॥ शिवरहस्यखंडे ।
रुद्ररूपशिवज्ञानी सर्वांगे लिंगसंगिनः । कर्मिमंतरेण दहनान्नरकः कालमक्षयं ॥ लिंगमूर्तिर्हृदृ
श्यं ये देहे धार्यं विचार्य सर्वांगलिंगसंपूर्णं तद्देहं शिवमुच्यते । तद्देहं दहने कर्मी नरकः कालमक्षयापि

७१ वि॥ एवं च यावदग्निहोत्रं जुहुयात्। अहरहस्संध्यामुपासीत स्नानसंध्याजपो होमस्स्वाध्यायः पितृतर्पणं। आ
तिथ्यं वैश्वदेवं च षट्कर्माणि दिने दिने दद्यादहरहश्श्राद्धं पितृभ्यः प्रीतिमाहरन्नित्यादिना स्वविहिताकरणे
प्रत्यवायजनकयावज्जीवकर्तव्यनित्यनैमित्तिकादिसकलकर्माणि परित्यज्य अश्वालंभं गवालंभं संन्यासं
पलपैतृकं देवरेण सुतोत्पत्तिः कलौ पंच विवर्जयेदिति वेदनिषेधसत्वेऽपि लिंगधारणरहितब्राह्मणानां
प्राणलिंगात्मस्नानदानादिवत्तत्कर्मानुष्ठानानंतरं गार्हस्थ्यं परित्यज्य पत्याश्रमात्विकारे गृहस्थाश्रमफलवल
नवत्सत्कर्मज निर्वाणपूर्वोक्तवदात्मनिवर्तितेनवा ॥ अग्न्यभ्यन्तरा श्रुतरविनाशिनो योगादेः कालांतरभाविस्वर्ग
जनकत्वान्यथानुपपत्त्या कल्पितनापूर्वेण स्वकर्माधीनलोकप्राप्तिहेतुत्वेन सन्न्यस्तानामपीशपूजया मुक

पंथे सन्न्यासस्येति सिद्धांतवचनानुपपत्तिः॥ न च निष्कामतया कृतकर्मानुष्ठानस्य मुक्तिप्रयोजकत्वे
न स्वर्गकामो यजेदित्यत्र स्वर्गपदस्य यन्न दुःखेन संभिन्नं न च ग्रस्तमनंतरं। अभिलाषोपनीतं
यत्तत्सुखं स्वःपदास्पदमित्यादिवाक्यबोधितस्वःपदवाच्यनित्यसुखस्वरूपमोक्षपरत्वकल्पनेन पर्यात्स
तिमाहत्स्य कृतकर्मजनितापूर्वस्य सत्त्वेपि न मुक्तिहानिरिति वाच्यं। नहि निष्कामतया कृतकर्मानुष्ठा
नेनैव मोक्षसिद्धौ यावज्जीवकर्मसकलकर्मत्यागपूर्वकमाश्रमान्तरस्वीकारे प्रयोजनाभावात्॥
न च तान्यत्र कर्मसंत्यागान्मोक्षसिद्धिं ति मानवाः। न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमा
नशुरित्यादौ नाकर्मत्यागेनैव मोक्षप्रदर्शनेन यत्याश्रमस्वीकारोऽप्यावश्यक एवेति वाच्यं। तादृशवाक्य

७२ नांतमेवं विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनाय तरति शोकमात्मविद्व । ज्ञानादेव तु कैवल्यमित्या

द्यनुरोधेन ज्ञानस्य साक्षात्त्वमीयनात्तद्द्वारककर्मणां मुक्तिहेतुत्वं न साक्षादित्यत्र तात्पर्येण तु ज्ञानय

तद्धेतुत्वं नाविलम्बत्वे विश्वस्यानित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयं । ज्ञानं च विमलीकुर्वन्नभ्यासेन च

पाचयेदिति । अभ्यासात्तस्य विज्ञानं कैवल्यं लभते नरः ॥ धर्मात्सुखं च ज्ञानं च ज्ञानान्मोक्षोऽधिगम्यते । कर्म

णैव हि संसिद्धिमास्थिता जनकादयः ॥ न्यायार्जितवित्तस्तत्त्वनिष्ठोऽतिथिप्रियः ॥ श्राद्धकृत्सत्यवादी च गृह

स्थोऽपि विमुच्यते । काश्यां तु मरणान्मुक्तिरित्यादिवाक्यविरोधापत्तेः ॥ तादृशवाक्यानां ज्ञानद्वारा कर्म

णां मुक्तिजनकत्वबोधकतावच्छेदकीयेन तत्कर्मजनितापूर्वस्य फलोदयपर्यन्तस्थायित्वप्रतिपादकत्वसिद्धेः

न बाधानापत्तेः। किंच वाशिष्ठविश्वामित्रादीनां नित्यनैमित्तिकादिसकलकर्मानुष्ठानश्रवणान्मैवं

जीवन्मुक्तिदशापन्नत्वेन मुक्तपर्यंते संन्यासाश्रमस्वपरत्वोपयोगाच्चेत्यादि यौक्तिकभावसत्वेपि त्ववनन सृश्रवणा

कुर्वीत वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः इत्यादिवाक्यानुरोधेन शंकराचा

र्यैः कलिंसंयोगापवृत्तत्वात्साधितत्वेन चतुराश्रमोऽङ्गीक्रियते। यथा च ब्राह्मणमात्रस्यापि त्रमेघादिपाठ

तानेकमंत्रदेहनविधानेपि त्वात्वागृहस्थधर्मत्वाद्याप्तायते हसंस्कारमात्रे रेत। शिष्ये स्वविरमालो

कृयगंयुयुध्ये लंकृते। न सगीवादिकेश्वापीकुंकुमाद्यैः कुशोदकैः। प्रोषितं जपशब्दे नंदुदुमिध्वानि

नातदादिशां प्राचीमुदीचीं चागताततत्वनेत्वधः विशुद्धयेनुपाप्ते नेगवैश्यारीरेनिःक्षिपेद्यतेः इत्सांगीर

७३ सत्कप्रकारेणानुरोधेन यतीनामपरेणेऽश्राद्धेत्यस्मादिने वा विधीयते। आशौचे तु धृता स्नानध्येहि सुयात्रां व्रजेन्नरः।
ज्ञाति पुत्रकलत्राणां परिज्ञाडम्बरेणोंपदि। अशौचे ज्ञातिवेषां चेत्स्नान मध्याह्ने स्नाते स्नातोन दहनं कार्यपरहं
सत्यस्यसर्वदा। कर्तव्यं त्वेनतेन स्वनाशौचे ज्ञेनोदकक्रिया॥ अन्येषामपीमिसूत्तोऽत्वेनन पूर्वं माचारे हि सादि
मनस्मृतिसूत्रसंहितावचनानुरोधेन चत्ते क्षांत्वेनमादिकमण्यं गीक्रियते तथैवच॥ महापाशुपतानां
लिंगागं लामरलज्ञानवतां लिंगधारणामण्डवतानेत्वेननस्नानकस्य तिस्त्रुतीपुराणादि विहितत्वेनापितु
त्वादिशास्त्रिद्वारेणाशुपपत्तो गौदहनस्य पे वह्नरुत्स्यस्यागृह्यकरीत्या वेषामनवोक्षितत्वेन चर्मसोपपत्तो गौत्वेनन
क्रियेवयुक्तमुत्तमः। स्मरणां तु विशेषः। मार्गशीर्षानां (पूर्वशैवानां) यावज्जीवपर्यंतनित्यनैमित्यका

दिसकलकर्मानुष्ठानमाचरणामेवावस्थानप्राप्त्यावाहितात्मीशेषस्मरणोत्सविहितपूर्वकालएवप्राजापत्ये
ष्ठानानामात्मारोपणविधायत्वेननैष्कैपतेश्वलिंगीभावाह्लणानान्तुकेषांचिध्यानज्ञानवक्तैर्भ्याकरणप्र
सत्वात्पजनकनिसर्गतोमिलिकादिसकलकर्मानुष्ठानपरिहारपूर्वकमात्मश्रमंतरलीकारः इति ॥ अतएवमह
पाशुपतानामाचार्यैरुक्तः पाकटरक्षलस्यादि वेदादिदोषायादिवस्त्रेवर्जीगलिंगलक्षि हि त्वनिरस्तप्राकृततनु
संबंधाणवादिमलानां लिंगाङ्गस्थलतत्त्वैक्यानुसंधानवतां कालपरिपाकाद्देहावसाने नसापिंड्यादि
कमकर्तव्यमेवप्रेतत्वसत्वात् । इदं हि सापिंड्यकरणं प्रयोजनं पित्रादीनां देहत्यागे प्रबलनिवृत्तिं विना ।
तेषां पितृलोकप्राप्त्यभावेन तद्वारा उत्कर्षभावेन च तन्निवृत्त्यर्थं चतुर्दश्या निवृत्त्यर्थं प्रेतत्वसन्निवृत्तिस्तुः ।

पिंडसंयोजनादूर्ध्वं चतुर्थो विनिवर्तते इति वचनानुरोधेन द्वादशे ऽहनि दीर्घप्रेतपिंडस्य धाविपज्य कृत्स्य देवता
लवपितृपितामहादिपिंडत्रयेण संयोजने प्रेतोदकस्य तदुदकेन सह संयोजनेन च येवल निवृत्तिर्भवति । तस्य
च तद्दूष्यपितामहस्थाने प्रवेशलाभ इति तात्पर्यार्थः । एवमभिपूर्वतंत्रे । तस्मात्तत्र प्राजापत्यां शवकृष्णला
निर्वपेत् । प्राजापत्यां प्रजापतिदेवताकां शवकृष्णलां सुवर्णशकलां । महीमेतां चरुं निर्वपतीत्यत्र दर्शपूर्ण
मासप्रकृतेके ऽपि विशेषे पुरोडाशविशेषो पयोगो सुवर्णशकलेष्ववहननं कर्तव्यं नवेति विषये दर्शपूर्णमा
मासिके प्रविहित व्रीहीनवहंतीत्यनेनावहननस्य स्पष्टाम्नातत्वेन प्रकृतिवद्विकृतिः कर्तव्येति चोदकवशात्सुव
र्णशकले ऽवहननं कर्तव्यमेवेति पूर्वपक्षः । अवहननस्य तुषविमोकार्थत्वात्तंडुलनिष्पत्त्युपयोगित्वेन व्रीहिषु

नुपनिवृत्तमवहननप्रसक्त्यावधीत्तु वर्ग्गाश्च कलेवरद्वारोपावेन तावहननप्रसक्तिरितिलिंगस्यानिवर्तनेन प्रकृतेप
रशैवैकपशाश्चिमतामहापातृपत्नीनां लिंगधारिण्याह्यपत्नीनां कुटुम्बत्वानां सर्वेषां पतीनां लिंगधारिणां
देवत्वमेवमवशिष्टत्वं नैवविद्यत इति स्कांदपुराणोक्तप्राक्तनजन्मवत्त्वेनलाभावितप्रसक्तं हि प्रतिषिध्यत इ
तिन्यायेनप्रसक्त्यभावेन निवर्तकप्राप्त्यशिवलकरणेप्रयोजनाभावान्न चेत्तु तन्निवर्तकस्यापिंडादिकरणेप्रयो
जनाभावएव॥ ननु लिंगाङ्गीकारश्रवणान्मोक्षे देहावसाने प्रतत्वाभावेपि विद्या कल्पितजीवभावस्य ह्यभावेन त
त्रिवृत्लिंविताम्रतपुत्रस्येश्वरसदाशिवपरमेशी वत्सरूपतत्वं पितामहप्रपितामहैस्तैः साम्यसंभवेन वर्गे
त्रयप्रवेशस्थावालस्य त्रस्य हृद्युग्मपितामह निवृत्त्याभावेन वर्गत्रयप्रवेशाकमासिकादिश्राद्धकरणेप्रवृत्तिर्न

७५ स्यादि निवेदनकर्मणं सावधानेन॥ चतुर्थस्य निवृत्त्यर्थे जीवभावनिवृत्तितः॥ तत्त्वादियोजनादूर्ध्वं चतुर्थी या निवर्तते
इति मकुटागमोक्तप्रकारेणोभयनिवृत्तिः। तथाहि॥ तत्त्वादियोजनादूर्ध्वमित्यत्र तत्त्वशब्देन षट्त्रिंशत्तत्त्वानां स्था
दिशब्देनाष्टत्रिंशत्कलानां च ग्रहणं भवति। तथा च मतनपुस्तके एकादशेऽहन्येकोद्दिष्टेन षोडशादिकं निर्वर्त्य
द्वादशेऽहनि सप्राप्ये मतनपुस्तके एकाग्निना वाग्नेन त्रिपञ्चपिना महान्तीश्वरसदाशिवपराशिवस्वरूपं स्थितलं आव
माहेश्वरेणावाहयेच्च शिव महेश्वर सदाशिवपराशिवस्वरूप पितृपितामहप्रपितामहस्वधाप्रपितामहाधिष्ठिन
षट्त्रिंशत्तत्त्वान्यष्टत्रिंशत्कलाश्च तत्समसंख्याक माहेश्वरेषु मावपक्षेके पुच्छे ॐ हां पार्थिवतत्त्वमावा
हयामि। ॐ हां जलतत्त्वमावाहयामि। ॐ हां तेजस्तत्त्वमावाहयामि। ॐ हां वायुतत्त्वमावाहयामि इत्यादिना पृथ्व्यादी

मलमारभ्य शिवतत्त्वपर्यंतं ईशानस्सर्वविद्यानां शांशिनीमावाहयामि। ईश्वरस्सर्वभूतानां मंगदामावाहयामि।
ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माधिष्ठामावाहयामि। ब्रह्माशिवोमेस्तु मरीचिमावाहयामि। सदाशि
वोंज्वालिनीमावाहयामी इत्यादिना शांशिनाकलामारभ्य ष्ठित्यव्य कलापर्यंतं साक्षतबिल्वदलेनावाहयेत्
ततश्च तत्तत्कला स्वरूपमाहेश्वराणां विष्टरब्रह्मादिकं पूर्ववत्केपादार्चनादिकं कृत्वा मे पितुः सर्वजीवभाव
निवृत्तिद्वारा शिवमहेश्वरसदाशिवशिवस्वरूपपितृपितामहप्रपितामहैक्यप्राप्त्यर्थं साक्षतबिल्वदलेषु
तत्कलासंयोजनं करिष्ये इति संकल्पं कुर्यात्। अथ च ओं हां पार्थिवतत्त्वं संयोजयामि। ओं हां जलतत्त्वं सं
योजयामि। ओं हां तेजस्तत्त्वं संयोजयामि॥ ओं हां आकाशतत्त्वं संयोजयामीत्यादिना शिवतत्त्वपर्यंतं

७६ षट्त्रिंशत्कलानां। ईशानस्सर्वविद्यानां शशिनीकलां संयोजयामि ईश्वरस्सर्वभूतानां अंगदां संयोजयामि॥ ब्र
ह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माधिष्ठां संयोजयामि। शिवो मे अस्तु मरीचिं संयोजयामि। सदाशिवों ज्वालिनीं सं
योजयामीत्यादिना पंचब्रह्ममंत्रैः शशिनीकलामारभ्य स्थितिकलापर्यंतं मष्टकत्रिंशत्कलानां संयोजने कृते मृ
तपुरुषस्य जीवभावनिवृत्तिद्वारा शिवमहेश्वरसदाशिवस्वरूपत्वसिद्धिः पितामहप्रपितामहैः रूपेयजमानस्य वृ
द्धपितामहनिवृत्त्या वर्गत्रयोद्देशक मासिकादिश्राद्धकरणे प्रसक्तिसिद्धिमेवतीति॥ अथ मार्गशीर्षे वा नां
गुरुरूपालब्धदीक्षासमये क्रियादीक्षानामविलक्षणकाले हरणोत्सवे दीक्षापाशप्रो अजननीगर्भेजातमांस
पिंडनिवृत्त्यर्थमापादमस्तकपर्यंतं संहारक्रमेण षडध्वन्यासानंतरं मंत्रपिंडोत्पत्त्यर्थं पुनः सृष्टिक्रमेण

षडध्वन्यासकरणं तत्कृतवत्कलासंयोजनादिनाशीघ्रं दैकसकरणनिमित्तता था वक्ष्यति चेन्नैवं। प्रागेवोदि
तस्यापीयत्नस्यभावनामात्रपिंडसंबंधेपीतस्यनावदेवशिरोयावन्मोक्षे। अथ्यात्मपरकस्यैरसादि श्रुतिः
बोधितजीवन्मुक्तिदशापन्नस्यैवपञ्चपञ्चांशत्संबंधवदाविर्युक्तपांचभौतिकदेहसंबंधस्यापीसत्वेतदधार
णप्रयोजकस्थूलपिपासादिप्रसक्तारागद्वेषादिकसंभवेनत्वनित्यनैमित्तिकादिसकलकर्मानुष्ठान
प्रयोजकश्रमसंभवात्लाघवाभिमानावष्टंभाभावेनचजीवभावनिवृत्तेः। किंच यादीक्षापरिप्राप्तस्यापीपार्थि
वत्वाभिभूतवस्तुवर्णरूपस्येवप्राकृतिकजीवभावाभिभूतत्वेनात्मकतयादेहावसानानंतरं शिवमहेश्वर
सदाशिव। परशिव। स्वरूपात्मपितृपितामहप्रपितामहवृद्धप्रपितामहाधिष्ठिततत्कलासंयोजनेनैकफ

७७ लकाविद्यकजीवभावादिरहितोपरमकैवल्यापन्नात्मकपरमशिवैक्यप्राप्तिस्सिद्धिरिति न च मोक्षसपिंड
स्य दीक्षाकाल एव निवृत्तिरिति वाच्यं । मंत्रपिंडात्मनिवृत्तिनन्विह तिरोभावनामात्रगम्यत्वात् । परंतु वाविच्छ
द्विन्वाभिवदुर्वासादिजीवन्मुक्तानामिवभोगेशैवानां पांचभौतिकदेहसंबंधः । पश्चपञ्चा भस्महस्त एवं तु
प्राकृतजनशरीरसंबंधसदृश इति श्रीभोगिविमर्शनीयदमरुकाख्यपादकानि तु वचनानि मकुटे चेद्दृष्टान
वि एतन्मा दर्शनेऽगितयेत्र कश्चित्कारणं पाठिनामन्यत्र संबंधेयानि कानिचित्पुद्गलहि यन्ते । मकुटागमे । तुर्हि दाक्षायणीक्षाय
शिवलिंगांगयोगतः । द्विरेफकीटन्यायेन शिवैक्यं प्राप्ते सर्वानुद्विजः ॥ लिंगांगसंगिनिम्नतेसंस्थापवेद्या दशेशे इह
नि ॥ सापिंडं नैव कर्तव्यं प्रेतत्वाभावतो मुनेः । दीक्षाकालपरिप्राप्तशिवैक्यं जीवभावतः । आविर्भूतिमि

तिष्ठतु शैवागमविस्तरः ॥ सदाशिवादयस्त्रिंशत्त्रयः पिण्डस्थलसंमिताः ॥ कलास्थंगस्वचान्यत्रसमभ्य-
स्या यथाविधि । जीवभावनिवृत्त्यर्थं वलादिन्योजयेत्स्थलं ॥ चेद्रूह्याने । द्वादशेह निसंख्यास्वेष्वत्र लिंगांगसंगिनः ।
जीवभावनिवृत्त्यर्थं कुर्यात्स्थलादियोजनं । लिंगांगसंगिनिष्ठाने सापिंडादिनकारयेनावलसंयोजनादेव जीवभा-
वो निवर्त्तते हि वीरागमे । आत्मविद्याशिवाख्यानि तत्त्वानि त्रय यथाक्रमं । त्वंपदं चात्मतत्त्वस्याद्विद्यातत्त्वमसीति
चात्तत्सदं शिवतत्त्वस्याद्वात्मतत्त्वात्मकं पुनः । पंचविंशति संख्याकं दशतत्त्वात्मकं तथा विद्यातत्त्वं शिवाख्यं स्यात्तत्त्वमेकमि-
ति स्मृतं तत्त्वानामधिपो ज्ञेया महेशश्च सदाशिवः ॥ शिवः परात्मस्त्रेवाशिवः परमकारणे । दीक्षात्रयप्रकारेणाद्यात्मादि-
लक्षितो मया । तथैवमयस्य च भक्तस्य सापिंडं क्रिंश्च योजने । तस्मात्त्वं तत्त्वपास्य समग्री च वीनीया यथाक्रमा । द्वादशेह निसं-

७८ प्राप्तेकल्याणोपशिवयोगेनइति॥ अत्रतलेभ्यणादंत्यत्रतत्वपदंकलानामप्युपलक्षितं॥ एवंपिंडतत्वकलानांकृत्य
णांतद्विषयानेभ्युणादिरूपाविभूषणांचार्चनेनततत्वादिसंयोजनंकार्यमितितात्पर्यमुन्नेयं। पद्मपुराणे। दहराकाश
लिंगस्यसतोयोगादिलिंगतः॥ लिंगमावात्मकतयाप्येतकार्यादिकंनहीति। मतांतराणामप्येसापिंडादिकमनिस
मेवा। पित्रादेरामश्रुअस्त्रीकाणेनेतरभाक्तोमरणप्रसक्तौ। तेषांचप्रागुदाहृत॥ शौनकमन्वादिस्मृतिभिःपिंडोद
कादिनिषेधेनसापिंड्याकरणायोगात। पितृर्ध्वहस्यतेपीपितामहादीनांवायुवहेतुल्लीभूततद्देशाकपिं
डाभावेनतस्यात्रप्रेतपिंडसंयोजनासंभवेनचतेनात्मीतदमावातायत्तेपितृपितामहादीनांसर्वेषांदहस्या
नामेवपत्रमरणप्रसक्तिलतैर्वस्यापिंड्याकरणमित्यनिसतेदुर्वारमेव॥ यद्युपीनचश्राद्धादिकंकर्मेनपिंडनोद

कक्कियाः तकुर्यात्सर्वारंभादौ निश्चिवलिंगाग्रसंगीने। प्रत्यहंतु तमुद्दिश्य शिवमल्कांश्वभोजयेत्। भल्केभ्योदलमन्नं
पात्र देवचाशिवायहीतिश्चारुद्र मातंगतिषेधवचनं तं तत्स्मृत्याश्रमीप्राणलिंगसंवंधो भस्मरुद्रघटिकां कथाकमंडलं भिक्षा
पात्रं दंडं चं धारयेदेतिवचनावगततनिस्यनैमित्तिककाम्यादिकर्मपरिहारपूर्वकं स्यत्कदारःपुत्रादि निराधार वीर
शैवपरमिसवगतं संगृह्यस्थानौ शिववद्रानैकनिष्ठानां लिंगांगिनां विशेषवीरशैवानां तु प्रतकृत्यपिंडाद
ययोगेपी लिंगांगाहूतौ निमित्तेनाशिवेदत्तरक्रियां।कुर्वीरन्कैवर्तमोल्कां शिष्यपुत्रादयो गृहे ह विशंकरसंहि
तावचनात्तुरोघेन स्वर्गलोकप्रकारेण सर्वमप्यवसानकृत्यं कर्तव्यमेवेति सर्वे समंजसमिति॥ नंदीश्वरेण
रचितालिंगधारणचंद्रिका समाप्ता ॥ ॐ ॥ छ ॥ ०॥

७८ ॐ॥ वीरशैवोत्कर्षप्रदीपिका लिख्यते ॥ श्रीशिवं सच्चिदानंदलक्षणं सर्वकारणं महालिंगमिदं नौमि सम्प्राप्त्यै
मुमुक्षुभिः॥ गुरुमनादिनिरंजनजंगमं परमसद्गुणसेव्यपरायणं॥ जगति वीठंदशैवाग्रमहेश्वरं प्रार्थितनाम
जुषं प्रणमाम्यहं॥ लीलामूर्तिरनादिजंगममयश्रीनीठंदषिस्तुष्यारस्वैरोग्यामकृपाकटाक्षलहरी प्राप्तेषदेशोत्त
ति॥ धर्मान्साधुसमीरयन्स्वभजकान्श्रीवीरशैवोचितान्स्वबोधं नो विमलं ददातु गुरुराट् श्रीशांतवीरेशपतिः॥ शां
तवीरेश्वरमूर्तिसल्लक्षणप्रापात्रनाम्नुपगतस्समंततोप्यात्मैव सैव स्थिति वलेविरक्तिमां स्तन्महामहिगुरुशिष्यदेशिकं॥
योगात्सिद्धगुरुस्सिद्धदेशिकानुग्रहात्प्राप्तशैवैनवैभवः॥ तत्त्वबोधनरतस्सुधापूरैर्मानितत्त्वचनवत्सप्तदेशिकः॥
तादृशगुरुमप्यच्छादिच्छयार्पदैतोमुरणपात्सैशीलवान्। तत्त्वमुक्तमनन्तं तथाविर्धंसन्मते चमसकथ्यता



मिति। इती ?यंनं मरि गाव्ये श्री लिंगे गुह ल्वं प्रश्न भुगोलं कं के माला। कलिं वितन्व न्निगमागमानुगां वदाम्य
हं श्रुणुविवितिसो वदन्मुदा सकलश्रुत्यागम पुराणप्रसिद्धाष्टावरणोपंचाचारविशिष्टतपो महालिंगैकपरायणो
क्षसाधनं नित्य ह लौकिकोलरोरुस्थूलगर्भीकृतषट्स्थलप्रतिपदकासेव्यं तशास्त्रप्रतिपादरूपहानक्रियापरिमेयेन
रूपपदार्थे समवेणप्रकारो मूलामलिंगशक्ति भक्ति हस्तमंत्रमुखपदार्थानुसंधानाष्टपषडमेदभिन्नस्थानावय
वी मूलेष्टलिंग भावलिंग पूजोपालनैकतानमान सतपाच विशिष्टाद्वैतज्ञानसंपन्नः श्री वी रै वत्स्य वोत्तरः॥
तथाहि। शंकरसंहितायां। अष्टावरणसंपन्नः पंचाचारपरायणः॥ वैदिकं कर्म कुर्वीत ज्ञानैकफलसाधन
मिति॥ योहस्तपीठे निजमिष्टलिंगं विन्यस्य तन्मीनप्रचारः॥ वाह्यक्रियासंकुलनिस्पृहात्मा संपूजयमस॰

वीरशैवः। क्रिमीकीटपतंगेभ्यः पशवःश्रेष्ठाधिकाः। पशुभ्योपि नराश्श्रेष्ठास्तेषु श्रेष्ठा द्विजातयः। द्विजातिभ्यो
धिका विप्राः विप्रेषु क्रतुबुद्धयः॥ क्रतुबुद्धिषु कर्तारस्तेभ्यो ध्यात्मविनो ऽधिकाः। तेभ्यो विज्ञानिनश्श्रेष्ठास्तेषु श्रेष्ठा
शंकरपूजकाः। तेषु श्रेष्ठा महाभागा मम लिंगांगसंगिनः॥ लिंगांगसंगिनोप्यधिकाः षट्स्थलज्ञानवान् वेत्ता तस्माद
दधिको नास्ति त्रिषु लोकेषु सर्वदा। एवं ध्यास्सर्वदा पूज्यस्संसारविजिगीषुभिः॥ बहुनोक्तेन किं वत्स सत्यं वाहं
न शासंशयः पारमेश्वरागमे। विभूतिपेसकाले स्विकंठे लिंगमहात्मकं। रुद्राक्षधारणं देहे सोहं देवीनशं
सयः॥ इत्यादिप्रमाणबलाद्वीरशैवानां सर्वोत्तमत्वं सिद्धं। ननु। श्रुतिभ्रष्टविप्रोक्तधापयस्विल्लभपंगतः क्रमेण
श्रुतिसिद्धार्थे मतत्वमन्त्रमाश्रयेदिति। श्रुतिप्रधानलिंगानां माननवनांत्रिवंत्र श्रुतिपयनिरतानां तस्माद नैव से

मंत्रस्यानं स्थल्लिनां हितरणां वेदमार्गतः पंचरात्रादयो मार्गाः कालेनैवोपकारकाः कापालं पंचरात्रं च यामलं वा
ममर्हतं एवं विधानि चान्यानि मोहनार्थानि तानि तु। विद्भूत्काप्षैवयेकें चिल्कपालकृतभूषणाः॥ शैवाः पाशु
पताश्चान्ये पांचरात्रास्तथा परे। तथान्याभ्भदुरान्मान सर्वे पीत्तुसुरदैवताः। पाशबद्धेन त्रवी धर्मो जगतः पा
लनाय स्मृताः। नेत्वं उयनि यस्माल्लेच्छ पाषण्डात्वेन हेतुनाप्युइत्यादिकौर्मवह्मकैवर्तसूतसंहितावाशिष्ठलैं
गपाराशरोपपुराणवचनैः केवलं तत्र मार्गाणामप्याणस्य निंदितत्वात्॥ वीरशैवानुष्ठेयधर्माणां तादृशतंत्रेषु
वविहितत्वेन वैदिके श्रुतिस्मृति॥ तिहासेष्वप्यदर्शनात्। तादृशधर्मानुष्ठानेन तत्पराणां वीरशैवानां धर्मा
णां पांचरात्रपाशुपतानां न धर्मावात कथं तद्धर्मानुष्ठानपराणामुत्कर्ष इति वाच्यम्॥ पाशुपतस्य वैदिकावे

८१ दिकभेदेन द्वैविध्यान्निषेधवचनानामवैदिकपाशुपतपरत्वेन विधिवचनानां वैदिकपाशुपतशैवपरत्वेन व्यव
स्थापनाय एवमप्यवैदिकत्वे कल्पितदव्याख्यानेपरिमलेपत्यस्तम। जन्माद्यधिकरणे पाशुपतभेदस्तुच्च
तत्र लकुलीशपाशुपतस्याग्राह्यत्वमभ्यधायि तस्माच्छैवधर्मतान्त्रिकत्वं निषेधतावच्छेदकं न भवति॥ ननु
लकुलीशपाशुपतस्याप्यप्ययदीक्षितैः कृतैः परिमलेऽवैदिकत्वेनाग्राह्यत्वप्रतिपादने पिवीर शैवधर्मप्रतिपाद
कागमानां लकुलीशपाशुपतानामविभिन्नत्वात् तेषामवैदिकत्वेनाग्राह्यत्वं पारंपर्येणागतमितिचेन्न॥ सिद्धा
न्तशिवागमलौ॥ वेदसिद्धान्तयोरैक्यमेकार्थप्रतिपादनात् प्रामाण्यं सदृशं हेयापेयं पाशुपतेरतयोः समता॥
क्रियापादोऽथवा शिवनिश्वाससंभूतिस्सर्वेशैवागमाः॥ अधिकाः शिवशक्तेभ्यस्साक्षाद्देवविं॥ निर्गताः॥

परस्पराविरुद्धार्थो शिवोक्तानिगमागमाः ॥ अल्पबुद्धिरन्योन्यविरोधः परिकल्प्यते ॥ निगमानामागमा
नां परमाप्तप्रदेशतः ॥ प्रामाण्यमविशेषेण ज्ञातमंतत्वदर्शिभिः ॥ इति वचनैर्वेदाविरुद्धवर्णाश्रमधर्मप्रति
पादकत्वेन सर्वोपपन्नपरमेश्वरैककर्तृकत्वेन च आगमप्रामाण्यस्याविशिष्टेऽभ्युपगन्तव्यत्वात् ॥ तदागमोक्ताचार
णां सर्वेषां वैदिकानुष्ठेयत्वं सिद्धम् ॥ अथवा शिवादिदेवतालयनिर्माणशिवलिङ्गादिप्रतिष्ठार्थान्य
वादिविधिमन्त्रोद्धारमन्त्रदोषमन्त्रसंस्कारमन्त्रन्याससमुद्राविधानादिषु केवलशिवागममूलेषु वैदि
कानां प्रवृत्तिर्नस्यात् किंत्वत्र सूतसंहितायां शिवमहात्म्यखण्डे व्यासवचनं विलम्बलौपयत्नप्रस्तावेऽष्टा
दशपुराणानां कर्त्ता सत्यवतीसुतः ॥ कामिकादिषु भेदानां यथादेशो महेश्वर इति । तद्व्याख्याने विद्यार

णेषु श्रीपादैर्व्यासवचनेषु विश्वासोत्पादनार्थमष्टादशोपपकमध्ये कामिकादीनां शैवागमानां शिवोक्तत्वप्रा
माण्यं यथा तथा नारायणावताररूपव्यासस्मरणेन तानामष्टादशपुराणां प्रामाण्यमिति श्रुतिप्रतिपादितम तस्मात्तदागा
मोक्तानां वीरशैवधर्माणां मनुष्ठेयत्वं सिद्धम । तथा च । तदागमेषु अनादिशैवमादिशैवं महाशैवमनुशैवमवान्त
रशैवं प्रवरशैवमन्त्यशैवमिति भेदेन सप्तसप्तविधानां शैवानां मध्ये स्वाचारभेदभिन्नानां सामान्यशैवः नामिश्रशै
वशुद्धशैववीरशैवरूपतया चतुर्विधानां मध्ये वीरशैवस्याचारभेदेन सामान्यवीरशैवविशेषवीरशैवनिराभारवी
रशैवभेदेन त्रिविधानां तदनुष्ठेयभस्मरुद्राक्षधारणपञ्चाक्षरीजपलिङ्गधारणगुरुलिङ्गजङ्गमपूजातत्प्रसा
दोदकप्रसादस्वीकाररूपाणां साधारणो वीरशैवधर्माणां कालाग्निरुद्रभस्मजाबालबिन्दुप्रवेदान्तसारोपनिष

स्थलिङ्गधारणादिप्रतिपादकेषु वृहत्तैत्तिरीयादिमन्त्रेषु शाङ्करसंहितासूतसंहिताशिवरहस्यस्कन्दपुराणादिषु का
मिकादिवातुलान्तेषु चातुर्विंशतिशैवागमेषु प्रतिपादितात्वाच्छाश्वितवीरशैवेषु च स्थलाद्वैदिकत्वं सिद्धम्॥
अन्यथा वैदिकत्वेनाभिमतानां ब्राह्मणानां रथोत्सवप्रतिष्ठादितान्त्रिकधर्मानुष्ठानवतामवैदिकत्वं स्या
त्- तथा च तत्समानन्यायतया प्रोक्तवैदिकत्वनिरूपणम्। ननु वीरशैवधर्मप्रतिपादकश्रुत्यागमानामाचार
भेदेन सामान्यविशेषनिराभारसमाख्यानवतां भक्तमाहेश्वरप्रसादिप्राणलिङ्गिशरणैक्यस्थलानामाचा
रलिङ्ग- गुरुलिङ्ग- शिवलिङ्ग- जङ्गमलिङ्ग- प्रसादलिङ्ग महालिङ्गाभिधानानां लिङ्गस्थलानां पूर्वोक्ता
नाङ्गस्थलानां स्वोत्तरोत्तरधर्माचरणस्य पूर्वधर्माचरणानन्तरभावितघटतया क्रमिकत्वेन तादृशधर्माचरण

८६ स काल हन्ति श्रीशैलादिदेशस्थितत्वयज्ञोपवीतधारणे लिङ्गधारणादिवैदिकतान्त्रिकधर्मसमुच्चयानुष्ठानपरा

णां विहितत्वेन नेतुं शक्यत्वात्। कथमाराध्येत्। केवलवीरशैवविषयत्वमिति चेन्न॥ अत्याश्रमिभ्यः परमं पवि

त्रं प्रोवाच सम्यगृषिसङ्घजुष्टम्॥ इति श्वेताश्वतरोपनिषदि॥ अत्याश्रमी सर्वदा सकृत्सदा जपेदिति कैवल्योपनिष

दि च। श्रूयमाणस्यात्याश्रमिशब्दस्य॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः॥ आवर्णाश्रमी चेति क्रमा

च्छ्रेष्ठा विचक्षणाः॥ गृहस्थोपि वानस्थस्य पदे रप्यनुचेक्षणा॥ विद्युत्कर्षबलेनैव गुरुर्भवति नान्यथा॥ वानप्रस्थाश्र

मस्थोपि तथा संन्यासिनो हरे॥ विद्योत्कर्षबलेनैव गुरुर्भवति नान्यथा॥ अतिवर्णाश्रमी प्रोक्तो गुरुः सर्वाधिकारि

णां॥ न तस्यापि भवेच्छ्रेष्ठो यथाहं पुरुषोत्तम॥ अतिवर्णाश्रमी साक्षाद्गुरूणां गुरुरुच्यते॥ यस्य वर्णाश्रमाचारो गलि

तस्यात्मदर्शनात् ॥ स्ववर्णेनाश्रमान् सर्वान्नतीत्यस्वात्मनिस्थितः ॥ योतीत्यस्वाश्रमान्वर्णानात्मन्ये
वास्थितः पुमान् ॥ सोतिवर्णाश्रमी प्रोक्तस्सर्ववेदान्तवादिभिः ॥ पञ्चाक्षरी परा विद्या शिवज्योतिरवाप्तये ।
ओंकारः प्रणवस्साक्षाद्विद्यान्तो बीजमुत्तमम् । तस्मादशेषतत्वानि प्रणवेन शिवे दधयेत् ॥ भस्मनोद्धूलयेद्देह
मग्निरित्यादिमन्त्रभिः ॥ त्रिपुण्ड्रञ्च मदग्नेरीतिकुर्यात्त्रिपुण्ड्रकम् ॥ विचिन्तयेदात्मलिङ्गं शम्भुमीशानीं वपुः शा
न्तमुमासहायम् ॥ भस्मोद्धूलाविष्कृतदीप्तदेहमस्याश्रमाचारमिमं वदन्ति ॥ अस्याश्रमीयं सर्वेषु चतु
र्ष्वाश्रमेषु च ॥ यः पशुस्स पशुत्वञ्च व्रतेनानेन सन्त्यजेत् ॥ विशोधयपञ्चतत्वानि प्रणवेनाथ वायुना
संस्थाप्य मध्ये चात्मानं निर्मले परमेश्वरे ॥ त्यावयित्वात्मनो देहं तेनैवाज्ञानवारिणा ॥ एष पाशुपतो यो

८४ गः पशुपाशविमुक्तये ॥ सर्ववेदान्तसारोऽयमत्याश्रम इति श्रुतिः ॥ इत्थं पाशुपतं येन सम्यगाचरितं मुदा ॥ त
स्य ज्ञानं विजायेत तेन पाशविमोचनमित्यादिकामिकस्कान्दलैङ्ग्याशीवागामवचनैः इतरवर्णाश्रमिणां वर्णाश्रम
धर्माचरणशीलेभ्यः उत्कृष्टत्वप्रतिपादनात् अत्याश्रमत्वं पञ्चमुखसमुद्भूतपञ्चमाश्रमवत्सु वीरशैवब्राह्म
णेषु पर्यवस्यतीति न पूर्वोक्तावर्णाश्रमपरत्वाशङ्कावकाशः ॥ अतएव पूर्वोक्तक्रिमिकीटपतङ्गोऽप्यम इत्यादि
वीरशैवोत्कर्षप्रतिपादकशङ्करसंहितावचनमप्यभिचरितं तथा पर्यवस्यति ॥ ननु अत्याश्रमप्रतिपा
दकश्रुत्यागमपुराणवचनानि न वर्णेष्वेव पर्यवस्यन्ति किन्तु वर्णाश्रमाचारवत्सु ब्राह्मणेषु ब्राह्मणोत्तमदरीके
ष्वपि पर्यवस्यन्ति ॥ तथाहि ॥ अतिवर्णाश्रमाचार इत्यत्र ब्राह्मणक्षत्रियवैश्यशूद्राश्च इति चत्वारो वर्णाः ॥

अशूद्राणामदुष्टकर्मणामुपनयनमध्ययनमग्न्याधेयं फलवन्ति च कर्माणीति योगपानि ब्रह्मचर्यं गार्हस्थ्य-
वानप्रस्थसंन्यासिभेदेनाश्रमाश्चत्वारः॥ तत्र गुरुकुलवासभिक्षाचरणवेदाध्ययनादिकं प्रथमा-
श्रमधर्मः॥ गर्भाधानादिश्मशानान्तकर्म सप्तपाकयज्ञसप्तहविर्यज्ञसप्तसंस्थायज्ञाः पञ्चमहायज्ञाः रूपाष्टा-
विंशत्संस्काराः॥ यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहणरूपाः षट्कर्माणीति द्वितीयाश्रमधर्माः
वनवासदारकन्दफलाहारनियमजटाजिनधारणकृच्छ्रचान्द्रायणाद्याचरणं तृतीयाश्रमधर्मः। पूर्वोक्ताश्र-
मन्त्रतपधर्मत्यागपूर्वकं ब्रह्मविचारभिक्षाचरणगणाद्वेषादिवर्जनवाङ्नियमैकवाससयोगाभ्यासादि-
कं तुरीयाश्रमधर्मः। अतिवर्णाश्रमाचारस्वतन्त्रश्चातिक्रान्तः वर्णाश्रमाचारानिति श्रुत्यादयः क्रान्ता यथे-

८५ द्वितीयपटेति व्याकरणानुशासनमर्यादया शब्दार्थो योजनीयः ॥ स च पूर्वोक्तधर्माचरणवत्सु सम्पन्नमिति । अतिवर्णाश्र-
माचारादिशब्दानां प्रतियोगिसापेक्षाणां प्रतियोगिसम्बन्धं विना कृतेभ्यसारा । अत्यतिक्रमे प्रवृत्तिः कथमुपपद्य-
ते निषेधवाचकानां शब्दानां प्रतियोगिसम्बन्धसम्भावनाशालित्वे वर्तनोचितस्यात् इति चेन्न । अतिवर्णाश्र-
माचाराः सम्यक्सूर्ध्वकृतः । ते वै साक्षान्महादेवे मोदन्ते यागमेषु वा । पञ्चाक्षरपञ्चब्रह्ममयो यथाजा-
तास्तथाधिकाः पञ्चब्रह्मास्यवेदवर्णोक्तमवद्‌कामतिप्रियास्सदा लिङ्गे शिवे भवेत्सोऽत्र मनः संयोगः स्वात्म-
यः तस्माल्लिङ्गाङ्गसंयुक्तो योऽपि सोऽस्त्वाश्रमी भवेत् । ईशानकाशाङ्गणेवे शङ्करानो लिङ्गाङ्ग शोभात्मो
क्षमार्गैकनिष्ठाः लिङ्गाङ्गसामरस्योच्चशरीरे लिङ्ग धारणं मः । नियमेनैव कृत्वा ते मुक्ताः संसारब

न्यनादिति कामिकागमक्रियासारोदाहृतवेदान्तसारोपनिषदादिवचनै । वीरशैवानामपि व
र्णाश्रमाचारादिशब्दानां रूढ्योपाधिविधेयत्वस्य सम्यग्वक्तुं शक्यत्वात् । न चात्राश्रमशब्दः रूढ्याश्रमधर्माव
रणेषु वर्तते । न श्रुतियोगेशब्दत्वादिति यदुपपन्नम् ॥ अपहतपाप्मादिशब्दानां वैदिकानां ब्रह्मणि श्रु
तियोगिनां पाप्मनामसम्भवात् प्रवृत्तिर्न स्यात् । किञ्च । शुक्लवामदेववत् ज्ञानिनां जन्मान्तरीयवर्णाश्र
मधर्मप्रकल्पनान्तवैयाकरणानुशासनविरोधः । न चैवमत्राश्रमिशब्दार्थसङ्गतिर्निर्वहणे वी
रशैवानामिति दिक्षानामितरेषां विरक्तानां ज्ञानिनां शूद्राणामप्यत्राश्रमित्वप्रसङ्ग इति वाच्यम् । श्रुति
वर्णाश्रमाचार इति वचनत्रयपावनामितहृदत्वाणालिनः आत्माश्रमिशब्दस्य केवलयोगेन पङ्क

जशस्यत्वगाभीलोत्पलादाविवहनेयुक्तत्वात् तद्धियौगपद्यहतीतिस्यात। अत एव काहीनशब्दस्यान्त्यन्तः ख
क्तताविति सूत्रमर्यादया अहर्गणवाचिनः द्विरात्रत्रिरात्रादिसाध्यक्रतुपरत्वमेव हीनो भवतीत्यहीनर
तियोगेन वैदिकादिकस्तुत्वानक्तत्वज्ञरपरामितिन्यहीनो वा प्रकरणादावित्यधिकरणेन तृतीयाध्याये पूर्व
तन्त्रे अपमेवन्यायेनुत्यादिनतस्मादत्याश्रमिशब्दो वीरशैवेष्वसम्भवति॥ यद्वा योगशक्त्याचीरशैवपरत्वं
कल्पयितुं शक्यते। तथा हि। तु हि च स्म ह वै पादपूरणे पूजने स्वतीति त्यमरकोशेन स्वती पूजायामिति सूत्रेण च
अतिशयिताः पूजिताः वर्णाश्रमाचारेष्विति व्युत्पत्तेः न चैतानि वचनानि अत्याश्रमिशब्दत्वस्याथर्वशिरो
जाबालजाबालोक्तेति कर्त्तव्यतापूर्वकानुष्ठेयपाशुपतापरपर्यायभस्मरुद्राक्षधारणरूपस्य त्वात्मज्ञानपूर्व

कादिलसंस्कारपरिष्कारगलस्थपक्षिक्लिन्नत्वजातीयत्वस्य लिङ्गधारणादिना रहितस्य वा सहितस्य वान्त्या
राध्यविप्रस्य वा उत केवलस्य वा स्वस्याश्रमिलसम्बन्धवाचकानि न सम्भवन्तीति न केवलवीरशैवप्रतिपादका
नीति वाच्यम्॥ वर्णाश्रमधर्मवतामाराध्यविप्राणामस्याश्रमिशब्दाभिधेयतायोग्यत्वात्। परमेश्वरपञ्चमुखस
म्भूतप्रमथगणनायकघण्टाकर्णगजकर्णरेणुकदारुकगोत्रजातानां केवलानि वर्णाश्रमधर्मानुष्ठा
पिनां केवलवीरशैवानामेवोक्तश्रुत्यागमपुराणेष्वस्याश्रमिशब्दप्रतिपादनौचित्यात्। न च प्रमथानां
परमेश्वरपञ्चमुखसम्भूतानामस्मत्कारणं प्राकृतमनुष्यवत्। प्राकृतत्वोपरिग्रहाभावात्
कथमेतेषां तद्वंशजत्वं तथा हि एषा अस्ति तर्हि आराध्यविप्राणामप्येतद्वंशजत्वमस्तीति वाच्यम्।

क्षत्रियोपपत्तेः क्षत्रियपायस्त्वात् क्षत्रियप्रस्पृशा क्षत्रियपैत्वाहेतिहशानवाल्यात्मकर्मणो क्षत्रियशब्दवाच्यत्वं नदीके
श्वरस्यतन्यत्न्याः सुपुशादेम्याः पुराणादिषु प्रसिद्धा याः । विद्यमानत्वे न लोकानुग्रहार्थं परमेश्वरस्य किरात
रूपादिधारणवत् ब्राह्मणस्त्रीपरिग्रहसम्भवेन तर्हि राजत्वं स्यादिपि केवला नां वीरशैवानां सम्भवात् क्षत्रियविप्रा
णामनुसर्वेषां तर्हि राजत्वस्यानुचितत्वात् । यदि वीरशैववर्माचरणाभिधाने तर्हि राजत्वमस्तीत्युच्यते । तर्हि भार्ग
रघुराजागस्त्याङ्गिरसविश्वामित्रभार्गववासिष्ठइत्यादिगोत्रजननलिमित्ताईत्वं न स्यात् । नैवेष्टापत्तिः । क्षत्रिक
मपात्वलायमानस्यश्वाशीविषमुखेनिपातननिमित्त ब्राह्मणत्वस्यापि भङ्गस्स्यात् न च वर्षिर्वै राजत्वं प्रमथवंश
जत्व सुभयत्वं राजत्वमस्माकं मारा क्षत्रियविप्राणां सम्भवतीति वाच्यम् ॥ किमुत्यत्स्या उमयवंशजत्वमुच्यते । किं

शिष्यत्वं प्रदापयेन वा। नाधः। गर्भेणेन सम्भवति तस्मात्कथं प्राप्तिरेतादृतिश्रुत्या गार्ग्यमवदेकः स्तोमयवीर्यो
त्पत्तो अस्य नलोकहास्यतास्यात्॥ नद्धी ह्रितीयः॥ तादृशत्वं प्रदापयास्य गोत्रेण तथा चतुर्थवर्णे स्यापि सम्भ
वात् तस्मात्केवलानां वीरशैवानां गणत्वं शजत्वात्। अस्याश्रमिशब्दवाच्यत्वेन सर्वोत्तमत्वं युक्तमेव॥
अत एव पूर्वोक्तस्मात्पापकूलवचनानि तेषेव सम्यग्युपयादपि तु मुच्यि तेनतरत्तिते॥ तथा हि विशुद्धः
प्राकृतास्त्वेति द्विविधा मानुषास्मृताः॥ शिवसंस्कारी गो शम्भुः प्राकृतादृतरे मताः॥ वर्णाश्रमादि
धर्माणां व्यवस्था हि द्विधा मता॥ एका शिवेन निर्दिष्टा ब्रह्मणा कथिता परा॥ शिवोक्तधर्मनिर्दिष्टा
तु शिवाश्रमनिशेविणाम्॥ शिवसंस्कारहीनानां धर्मः पैतामहास्मृतः॥ इति तस्मान्प्राकृता प्राकृतधर्म

भेदभिन्नमार्गितपागमेवं शैवराज्ञा न्यायप्राकृतानां वीरशैवानां मतिवर्णोऽयम् शब्दवाच्यानां पंचसूत्राश्र
मिणां मनितरसाधारणमसर्वाविशिष्टत्वम् पपद्यत एवेति न कोऽपि शङ्कावकाशः। तस्मात्तन्मतस्य सर्वोत्तमत्वं
सिद्धमेव तथैव प्रमाणानि। वीरशैवसदृशं मतमास्ति जगत्त्रये। सर्वश्रीगमर्द्द भुवणं। शिवसायुज्यदयकम्।
यथामत्स्यदृशो नास्ति पुरुषाणां तथा समा स्त्रीणां तथा वीरशैवसदृशं नास्ति वै मतम्॥ अविपापवशांते
कृत्वा हत्वा नतो। ज्ञानतो पिवा॥ वीरशैवमतं प्राप्य स्स्विवडावन संशयः॥ लिङ्गधारणमात्रेण शिवत्वप्राप्ति
कारणात्-शैवं मममतं देवि सर्वयोन्मुक्ति प्रदायकम्॥ यथा नदीनां सर्वासां पुण्यभागीरथी शिवे॥ य
थैव भवती सर्व योषितां पुरुषेषु चाहम्॥ यथैव काशीक्षेत्राणां तीर्थेषु मणिकर्णिका। मम पञ्चाक्ष

रि मन्त्रः सर्वमन्त्रेषु वैष्णवः॥ यथैव सर्वलोकेषु कैलासस्थानमावयोः॥ वीरशैवमतं देवि मम सर्वो
त्तमोत्तमम्॥ इति पारमेश्वरवीरागममवचनैश्च शिवस्य श्रुतिस्मृतिपुराणान्यापि सिद्धं सर्ववेदेषु वेदोत्तमोत्त
मं च वीरशैवमतस्य सर्वानिशायतं सिद्धम्। तन्मतनिष्ठो जात्याश्रमाचारभेदेन सामान्यवीरशै
वो विशेषवीरशैवो निराभारवीरशैवश्चेति त्रिविधः। तत्र ब्रह्मक्षत्राणानुक्रियामात्रवीरशैवकेलभवी
रशैवानन्दत्वं चिह्नकादिषु विस्तारेणोक्तत्वात् तदनुगतसर्वं प्रदापासिद्धं तया विचार्य मार्गेऽस्मत्पृष्ठकुला
लादयो लिङ्गिनः शूद्राः सामान्यवीरशैवाः॥ भक्तमाहेश्वराराध्याभिधाः ब्राह्मणाः लिङ्गधारिणः क्ष-
त्रियवैश्याश्च विशेषवीरशैवाः॥ लिङ्गाङ्गिब्राह्मणयतिनो निराभारः इति नियोपतेस्मातः एवंजङ्गमु

ण्डी शिखी वापि काषायवसनान्वितः निस्पृहो निजलिङ्गैकपूजको भिक्षाशी भयवर्जितः । कन्थाकमण्डलुधरो भूति
रुद्राक्षसंयुतः दण्डकौपीनधारी च निराभारः इति स्मृतः ॥ इति सूक्ष्मतन्त्रवचनैर्निराभारवीरशैवलक्षणप्र
तिपादनात् - विशेषवीरशैवापेक्षया चरजङ्गमादिशब्दवाच्यः निराभारवीरशैवदेशिकोत्तमः विरक्त
यासर्वोत्तमोत्तम इति निर्विवादः । किं च लिङ्गस्यादिस्वरूपत्वं जङ्गमः प्राणलिङ्गकम् । भावलिङ्गं गुरुः प्रो
क्तं त्रिविधत्वैकमुच्यते ॥ विज्ञानी पात्रभिदानन्ददेशिकोत्तमजङ्गमात् ॥ नित्यं पूर्णात्प्रसादं चात्मा
त्मभावेन भावयेत् ॥ वीरागमे ॥ लिङ्गाङ्गी गुरुलिङ्गं च त्रिविधत्वैकमुच्यते ॥ प्रसादो मुक्तिमूलत्वं प्र
सादो लिङ्गमुच्यते ॥ सिद्धान्तशिखामणौ ॥ एक एव शिवस्साक्षात्सर्वानुग्राहकः प्रभुः ॥ गुरुजङ्गम

लिङ्गत्वावर्तिते भुक्तिमुक्तिदः॥ इति वचनैर्गुरुलिङ्गजङ्गमानां सच्चिदानन्दस्वरूपाणां यथात्र लक्षणस्स।
च्चिदानन्दलक्षणलक्षितस्य व्यवहारदृष्ट्यासत्वेन चित्वेनच्चानन्दत्वेन भिन्नत्वेपि परस्परस्वरूपेणापृथ-
भेदोक्तीक्षिपते तद्वद्गुरुलिङ्गजङ्गमानां भिन्नत्वेपि शरणसमर्पणदयातत्वतश्चैक्यमेव सिद्धं भवति॥ चि-
न्त्व। तत्स्वरूपस्य त्रैकालिकाबाध्यतारूपसद्रूपस्याधिगम। इत्यस्त्वेदपि॥ चिद्रूपस्य स्वप्रकाशस्य सर्वप्रा-
र्थनीयत्वात् भावेन परमप्रेमास्पदत्वाभावेन तदुभयरूपप्रयोगानन्दस्वरूप एव विद्यमानत्वेन तस्य तथैव च
एतत्वस्य सर्वाभ्यर्हितत्वम्। तथाहि सिद्धान्तशिखामणौ॥ लिङ्गं तु द्विविधं प्रोक्तं जङ्गमाजङ्गमात्मना॥
अजङ्गमन्तु यल्लिङ्गं शिवयोगीति विश्रुतम्॥ लिङ्गस्य जङ्गमत्वेवतपाधिकं वदामि ते॥ जङ्गमं ज्ञानरू-

पन्तुक्रियारूपन्तु लिङ्गकम् ॥ स्वायंभुवागमे ॥ लिङ्गद्वयसमाख्यातं चरस्थावरमेव च। चरन्तु तिथिरूपं स्यादचरं पार्थिवा
दिकम् ॥ चरसंस्थवसत्येव प्रीतियुक्तो महेश्वरः ॥ अचरे मन्त्रसंस्कारैः स्वयं तिष्ठत्सदाशिवः ॥ शिवधर्मशास्त्रे ॥
स्थिरे सदा वसत्येव प्रीतियुक्तो महेश्वरः ॥ अचरे मन्त्रसंस्कारैर्ज्ञेयो नित्यं महेश्वरः ॥ शिवरहस्ये ॥ पदे देहमिति ख्या
तेयदार्थः प्राणा एव च ॥ उभयोरन्तरे यद्वत्तद्वत्स्याद्धि लिङ्गजङ्गमे। स्थावरं जङ्गमञ्चेति द्विविधं लिङ्गमुच्यते ॥ ज
ङ्गमस्यापमानेन स्थावरं निष्फलं भवेत् ॥ शैवरत्नाकरे ॥ लिङ्गक्षेत्रे गृहस्थानं गृहक्षेत्रं तु जङ्गमः ॥ जङ्गम
स्तु निराभारिमानाभरविवर्जितः ॥ इत्यादि सिद्धान्तशिखामणिस्वायंभुवागमशिवधर्मशास्त्रशिवरहस्या
दिवचनैश्च चराचररूपस्य लिङ्गस्य द्विविधस्य मध्ये मन्त्रसंस्कारायत्तमहिमास्थिरलिङ्गापेक्षया चरलिङ्गस्य

सार्वकालिकषट्स्थलज्ञानसंपन्नस्य जङ्गमशब्दाभिधेयस्याह्विरलिङ्गापेक्षायामधिकत्वं सिद्धमेव॥ अत एव
॥ अस्मिन्वाक्ये च विलेच लिङ्गे चागुह्यते ग्रहे॥ शिवयोगिशरीरे च सदा सन्निहितः शिवः॥ यदेकोऽत्र प्रविष्टश्चेज्जगन्त
र्पियत्नेविलम्॥ इत्यादिवचनानि ज्ञानिनश्चरलिङ्गस्याधिक्यप्रतिपादकानि बहूनि सन्ति॥ वैद्यप्राह्रे॥
इतिहासपुराणेषु शिवस्योत्पत्तिर्थिर्गुहः॥ श्रुतिपेः पादसलिलमधिकं हि जगत्त्रये॥ वीरागमे॥ जङ्गमस्यप्रसा
दान्नं नैवेद्यार्पणं सकलस्य पेत्॥ पादाम्बुजजलस्नानं विशेषो हि मया च्यते॥ पारमेश्वरे॥ पादाभिषेकसलिलैः ^
लिङ्गमज्जनमुत्तमम्॥ तस्मात्तदुच्छिष्टनैवेद्यं तथा भक्तिफलेधवम्॥ वायापुराणे॥ जङ्गमानां पादतीर्थै
र्लिङ्गमज्जनमुत्तमम्॥ तस्मात्प्रसादान्महादेवि नैवेद्यं शुभदं स्मृतम्॥ तस्माज्जङ्गमलिङ्गस्यप्रसादेन सपापे

८१ णीम्॥ अभिषेकजलस्नानं विशेषं मम कथ्यते॥ इत्यादिवैयशाल्वीरणामयारमेश्वरब्रह्माण्डपुराणवचनैर्लि
ङ्गस्थलजङ्गमपादोदकस्नानतत्प्रसादसमर्पणप्रतिपादनाल्लिङ्गापेक्षया जङ्गमस्याधिक्यं सिद्धमेव॥ ननु इ
ष्टलिङ्गम् जङ्गमकरणोराषां वचनानां श्रूयमाणत्वादिष्टलिङ्ग एव चरपादोदकमज्जनेन तत्प्रसादनिवेदनम्च
प्रकरणे स्यान्नम्॥ नास्थिरलिङ्गे अप्राकृतत्वादिति चेन्न॥ स्थिरलिङ्गार्चको मर्त्यः न शुद्धः पङ्क्तिकर्मसु॥
धृतलिङ्गार्चको मर्त्यः पावनः पङ्क्तिकर्मसु॥ चिति स्वचिति काष्ठस्वयूपं चाण्डालमेव च॥ स्पृष्ट्वा देवलक
स्त्वैव सवासा जलमाविशेत्॥ त्रिवर्षं देवतापूजां मन्त्रार्थं यः करिष्यति। स वै देवलको नाम सर्वकर्मसु ब
हिष्कृतः॥ इत्यादिवचनैः स्थिरलिङ्गार्चकस्य देवलकशब्दवाच्यतया सह वास सह पङ्क्तिभोजनादेरसाधा

निषेधदर्शनात्॥ न पावित्र्यादुत्कृष्टत्वप्रतिपादनाच्च। इष्टलिङ्गस्थिरलिङ्गपूजाकरणमुत्कर्षा
पकर्षप्रतिपादनादिष्टलिङ्गस्थिरलिङ्गयोः क्रमेणोत्कर्षापकर्षौ निश्चितमौ॥ तथा च॥ जङ्गमत्वस्पृश
र्वाभ्यर्हितत्वाल्लिङ्गप्राणरूपत्वाच्च स्थिरलिङ्गापेक्षया प्राणोत्कर्षे इष्टलिङ्गेपि जङ्गमपादोदकाभिषेचनग
दविन्यासादिके प्रतिकन्यासिद्धम्॥ एतदर्थानुसारीणि वचनानि। लिङ्गाङ्गी च समम प्राणो लिङ्गाङ्गी च सम
मप्रभुः॥ लिङ्गाङ्गी समकौ जीवौ लिङ्गाङ्गी समात्मकः॥ लिङ्गाङ्गी समकर्ता च लिङ्गाङ्गी समसङ्गुहः। पर
माद्वैतविज्ञाननिष्ठस्यास्य महात्मनः॥ शुश्रूषा क्रियते येन तस्या दोसममस्तके॥ निरपेक्षं मुनिं शान्तं निर्वै
रं समदर्शिनम्॥ अनुव्रजाम्यहं देवि पूयेयेत्यङ्घ्रिरेणुभिः॥ श्रीरामसमे॥ सर्वप्राणिहितार्थाय पसृज्ञापच्च

९२ कधारिणः॥ षट्स्थलज्ञानवत्वाच्छ्वानादि जङ्गमभूर्तयः॥ तएवमस्वपादाब्जं निधाय मम मस्तके॥ दत्वापादोद
कमर्ये प्रसादमेन कात्मजे। कुर्वन्ति वैभवं चित्रं पामन्तो ब्वेभ्यन्ति मामपी॥ मक्तोममप्रियो देवि भक्तः प्राणो ममैव तु॥ म
तो धिहि मज्जकस्तस्मात् जङ्गमं मामपूहम्॥ इत्यायागवाक्योक्तं नास्ति कैवेदिकेनवेन त्रिपादाद् ऊर्ध्वंडदे तस्त्रेश्वासित्व
र्थे प्रवर्तते। त्रिपादिति त्रयः पादाः यस्य तत्तस्मात् त्रिपादाच्छिवः गुरुलिङ्गं जङ्गमस्वरूपेषां पादत्रयवत्त्वीगणन्॥
ऊर्ध्वंडल्लक्षणवासात् उदेदुदिता वाच्छिवः। पुरुषो वेदनि इति श्रुत्यप्लेतीरीत्यतत्। पादोस्येहा शिवस्यैव लब्धोय
श्यमवत्पुनः॥ पुनरशब्दो विशेषार्थे वाजीवेशेष्मेमत्रच॥ असानिर्ध्वं जङ्गमस्य गुरोरश्वापितनतस्तथा॥ विध
न्याक्रामदिस्येवं व्यापकत्वं शिवस्य च॥ अनुसन्धाय मनसा गुरु जङ्गमतामपि॥ अशनानशने चोभे सम

वेत्वाशनं भवेत् ॥ अतो यो गर्वं भवेत्तत्र तत्र पर्यं यत्न लभ्यते ॥ तदात्वनशनं प्रोक्तमदं पातितमत्युतं ॥ त्रिपाद
मात्रमश्नीयात् त्रिपादोदकधारणं इति चेत्तत्र मन्त्रा न्नेसाशनानशने उभे ॥ गुरुर्लिङ्गं चरणं त्रयं पा
द त्रयमनुप्य ॥ विहितेन त्रमेदस्व द्वयोरेक स्यह मनः ॥ वचनान्तरेपि स्मार्थाः सन्त्येषा स्तत्रता नितु ॥ गु
रोर्लिङ्गपदेन प्रोक्तं लब्ध्वा तत्र पदोदकम् ॥ गुरुजङ्गमपादोदं लब्धनानेव भक्तितः ॥ समर्पयेद् गुरोस्त
त्र गुरोर्लब्ध्वा पदोदकम् ॥ पादोदकं जङ्गमस्य लब्ध्वान्मन सेवतम् ॥ गुरुलिङ्गचरणानां त्रयं समर्पयेत्तु
भक्तिमान् ॥ पादोदकं चरणं लब्ध्वा गुरोर्लिङ्गस्य भक्तिमान् ॥ अश्नीयादशनं भक्ते रन्यथानशनं भवेत् ॥ तत्रोद
नशनं प्रोक्तमभक्ष्यमसमर्पितम् ॥ अत एव शिवानन्दलहर्यामपि युक्तं वचनमपि ॥ मा गोवर्जितपादुकापश्च्य

९२ नेरुः स्यकूर्चापतेन गण्डूषाम्बुनिषेचनं पुरारियो दिव्याभिषेकायते ॥ किंचिद्भक्षितमांसशेषकवलं नव्योपहारायते भक्तिः

किन्न करोत्यहो वनचरो भक्तावतंसायते ॥ तस्माल्लिङ्गे जङ्गमपादोदकमुचिततरमिति सिद्धम् । ननु एतादृश

पूर्वोक्तवचनानां त्वार्थवादमात्रपरत्वाभावाच्च एभिः वचनैः कथं तीर्थप्रसादसमर्पणापादविन्यासादिकं कर्तव्य

त्वेन कथमङ्गीकर्तुं शक्यमिति चेदुच्यते ॥ औदुम्बरो यूपो भवति । उपांशुयाजमन्तरा यजतीत्यादावि

वलदत्वेन मानान्तरस्याप्राप्त्या तस्य लेदत्वपरिणामं कृत्वा विधायकस्याङ्गीकर्तुमुचितत्वात् । न च वेदे

बुलेदत्वपरिणामापत्तौ कारेपि स्मार्तागमवचने भूतयाङ्गीकर्तुमशक्यत्वात् त्वदभिमतासिद्धिः कथं संग

च्छत इति वाच्यम् ॥ तर्हि । इतिहासपुराणस्मृतिवाक्येष्वपि एतादृशान्यायप्रवृत्तिर्न स्यात् । न चेष्टापत्तिः ॥

लोपं क्रतूनां गुरुदारांश्च गत्वा सुरां पीत्वा ब्रह्महत्यां कृत्वा भस्मच्छन्नो भस्मशय्याशयानो रुद्राध्यायी
मुच्यते सर्वपापैः इति शातातपस्मृतिवचनस्य। गायत्रीजकोटिस्तु ब्रह्महत्यां व्यपोहति॥ एकादशगु
णोन्वापि रुद्रजाप्यस्य धर्मवित्॥ महापापैरपि स्पृष्टो मुच्यते नात्र संशयः॥ सन्ध्यास्नानं जपो होमो दे
वतानाञ्च पूजनम्॥ आतिथ्यं वैश्वदेवं षट्कर्माणि दिने दिने॥ इत्यादिलोकप्रसिद्धानां प्रायश्चित्तका
ण्डे विज्ञानेश्वरमतवादि धर्मशास्त्रव्याख्यातृभिः॥ आचारकाण्डे परिगृहीतानां वचनानाञ्च स्वोक्ता
र्थे प्रामाण्यं न स्यात्। तस्मादुदाहरणमात्रेणोन्मार्गावलम्बप्रवृत्तिरिति निश्चितव्यम्। नन्वेतेषां स्मृतिपुराणो
क्तीनां वेदमूलकत्वात्। वेदवत्प्रामाण्यस्थापनसम्भवेप्यागमवचनानां तथा प्रामाण्यं न सम्भवतीति चे

८९ न्वेदागमयोरेककर्तृकत्वात्। वेदविरुद्धधर्मप्रतिपादकत्वाभ्युपगमनिश्चितत्वात्तदपेक्षयान्त्यजोऽष्टपुटव्यापारोऽभ्यारि
तकामिकाद्यागमानामृग्वेदयजुर्वेदवत्वामदाक्षिणात्येनेत्र वचनसमप्रधानत्वात् प्रामाण्यं सिद्धमेवेति वेदागमाना
मितरवचनैर्विधीयमाने कर्माशेषे एकवाक्यतायामिति सर्वसमञ्जसम्॥ श्रीषट्स्थलचक्रवर्तिनिरञ्जनजङ्ग
मस्वरूपतोऽस्मद्गुरुसिद्धेश्वरकारुण्यप्रसादपात्रामुग्धापुरस्थेयचनवसवेश्वरस्वामिविरचितवीरशैवसर्वोत्कर्ष
प्रदीपिका परिसमाप्ता॥ ॐ ॥ श्रीगुरुवसवलिङ्गायनमः॥ ॐ ॥ ॐ ॥